ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

## (वाक्य सहित)

## पञ्चमकाण्डे प्रथमः प्रश्नः

**Notes:**

1. **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **January 31, 2021**

## Version Notes:

**This is now the current Version 1.0 dated January 31, 2021.**

1. This replaces the earlier version 0.1 dated May 31, 2020.
2. This version has been updated with the errors found and reported till January 31, 2021.
3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.
4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st August 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.0 dated 30th September 2019 |
| 4th | Version Number | 0.1 dated 31st May 2020 |

**Table of Contents**


# 5 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

## पञ्चमं काण्डं 4

### 5.1 पञ्चमकाण्डे प्रथमः प्रश्नः – उख्याग्निकथनं .......... 4

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः , हरिः ओं

# 5 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमं काण्डं

## 5.1 पञ्चमकाण्डे प्रथमः प्रश्नः – उख्याग्निकथनं

**TS 5.1.1.1**

सावित्राणि जुहोति प्रसूत्यै चतुर्गृहीतेन जुहोति चतुष्पादः पशवः पशूनेवा ऽव रुन्धे चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति छन्दाꣳसि देवेभ्यो ऽपाऽक्रामन् न वो ऽभागानि हव्यं वक्ष्याम इति तेभ्य एतच्चतुर्गृहीत–मधारयन् पुरोनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुर्गृहीतं जुहोति छन्दाꣳस्येव तत् प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति यं कामयेत – [ ] **1**

**TS 5.1.1.1 - Padam**

सावित्राणि । जुहोति । प्रसूत्या इति प्र – सूत्यै । चतुर्गृहीतेनेति चतुः – गृहीतेन । जुहोति । चतुष्पाद इति चतुः–पादः । पशवः ।

पशून् । एव । अवेति । रुन्धे । चतस्रः । दिशः । दिक्षु । एव । प्रतीति । तिष्ठति । छन्दाꣳसि । देवेभ्यः । अपेति । अक्रामन्न् । न । वः । अभागानि । हव्यम् । वक्ष्यामः । इति । तेभ्यः । एतत् । चतुर्गृहीतमिति चतुः – गृहीतम् । अधारयन्न् । पुरोनुवाक्याया इति पुरः – अनुवाक्यायै । याज्यायै । देवतायै । वषट्कारायेति वषट् – काराय । यत् । चतुर्गृहीतमिति चतुः – गृहीतम् । जुहोति । छन्दाꣳसि । एव । तत् । प्रीणाति । तानि । अस्य । प्रीतानि । देवेभ्यः । हव्यम् । वहन्ति । यम् । कामयेत । **1 (50)**

**TS 5.1.1.2**

पापीयान्थ् स्यादित्येकैकं तस्य जुहुया–दाहुतीभिरेवैनमप गृह्णाति पापीयान् भवति यं कामयेत वसीयान्थ् स्यादिति सर्वाणि तस्याऽनुद्रुत्य जुहुयादाहुत्यैवैनमभि क्रमयति वसीयान् भवत्यथो यज्ञस्यैवैषा–ऽभिक्रान्तिरेति वा एष यज्ञमुखा–दृद्ध्या योऽग्नेर्देवताया एत्यष्टावेतानि सावित्राणि भवन्त्यष्टाक्षरा गायत्री गायत्रो – [ ] **2**

**TS 5.1.1.2 - Padam**

पापी॑यान् । स्या॒त् । इति॑ । एकै॑क॒मित्ये᳚कम् – ए॒क॒म् । तस्य॑ ।

जु॒हु॒या॒त् । आहु॑तीभि॒रित्याहु॑ति – भि॒ः । ए॒व । ए॒न॒म् । अपे॑ति ।

गृ॒ह्णा॒ति॒ । पापी॑यान् । भ॒व॒ति॒ । यम् । का॒मये॑त । वसी॑यान् । स्या॒त् ।

इति॑ । सर्वा॑णि । तस्य॑ । अ॒नु॒द्रु॒त्ये॑त्यनु – द्रु॒त्य॑ । जु॒हु॒या॒त् ।

आहु॒त्येत्या – हु॒त्या॒ । ए॒व । ए॒न॒म् । अ॒भीति॑ । क्र॒म॒य॒ति॒ । वसी॑यान् ।

भ॒व॒ति॒ । अथो॒ इति॑ । य॒ज्ञस्य॑ । ए॒व । ए॒षा ।

अ॒भिक्रा᳚न्ति॒रित्य॒भि – क्रा॒न्ति॒ः । एति॑ । वै । ए॒षः । य॒ज्ञ॒मु॒खादिति॑

यज्ञ–मु॒खात् । ऋद्ध्या᳚ः । यः । अ॒ग्नेः । दे॒वता॑याः । एति॑ । अ॒ष्टौ ।

ए॒ता॑नि । सा॒वि॒त्राणि॑ । भ॒व॒न्ति॒ । अ॒ष्टा॒क्षरे॒त्यष्टा – अ॒क्ष॒रा॒ । गा॒य॒त्री ।

गा॒य॒त्रः । **2 (50)**

**TS 5.1.1.3**

ऽग्निस्तेनै॒व य॑ज्ञमु॒खादृ॒द्ध्या॑ अ॒ग्नेर्दे॒वता॑यै॒ नैत्य॒ष्टौ सा॑वि॒त्राणि॑

भ॒वन्त्या॑हुतिर्न॒वमी॑ त्रि॒वृत॑मे॒व य॑ज्ञमु॒खे वि या॑तयति॒ यदि॑ का॒मये॑त

छन्दा॑ꣳसि यज्ञयश॒से᳚ना ऽर्पये॑य॒मित्यृच॑मन्त॒मां कु॒र्या॑च्छन्दा॑ꣳस्ये॒व

यज्ञयशसेनाऽर्पयति यदि कामयेत यजमानं यज्ञयशसेना–ऽर्पयेयमिति यजुरन्तमं कुर्याद्–यजमानमेव यज्ञयशसेना–ऽर्पयत्यृचा स्तोमꣳ समर्द्धयेत्या – [ ] 3

**TS 5.1.1.3 - Padam**

अग्निः । तेन । एव । यज्ञमुखादिति यज्ञ – मुखात् । ऋद्ध्याः । अग्नेः । देवतायै । न । एति । अष्टौ । सावित्राणि । भवन्ति । आहुतिरित्या – हुतिः । नवमी । त्रिवृतमिति त्रि – वृतम् । एव । यज्ञमुख इति यज्ञ – मुखे । वीति । यातयति । यदि । कामयेत । छन्दाꣳसि । यज्ञयशसेनेति यज्ञ – यशसेन । अर्पयेयम् । इति । ऋचम् । अन्तमाम् । कुर्यात् । छन्दाꣳसि । एव । यज्ञयशसेनेति यज्ञ – यशसेन । अर्पयति । यदि । कामयेत । यजमानम् । यज्ञयशसेनेति यज्ञ – यशसेन । अर्पयेयम् । इति । यजुः । अन्तमम् । कुर्यात् । यजमानम् । एव । यज्ञयशसेनेति यज्ञ – यशसेन । अर्पयति । ऋचा । स्तोमम् । समिति । अर्द्धय । इति । 3 (50)

**TS 5.1.1.4**

–ह समृद्ध्यै चतुर्भिरभ्रिमा दत्ते चत्वारि छन्दाꣳसि छन्दोभिरेव

देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्या अग्निर्देवेभ्यो निलायत

स वेणुं प्राऽविशथ् स एतामूतिमनु समचरद्–यद्–वेणोः सुषिरꣳ

सुषिरा–ऽभ्रिर्भवति सयोनित्वाय स यत्रयत्राऽवसत् तत् कृष्णमभवत्

कल्माषी भवति रूपसमृद्ध्या उभयतः क्ष्णूर्भवतीतश्चाऽ–( )

–मुतश्चाऽर्कस्या–वरुद्ध्यै व्याममात्री भवत्येतावद्वै पुरुषे वीर्यं

ँवीर्यसम्मिता ऽपरिमिता भवत्य–परिमितस्याऽ वरुद्ध्यै यो वनस्पतीनां

फलग्रहिः स एषां ँवीर्यावान् फलग्रहिर्वेणु–र्वैणवी भवति

वीर्यस्यावरुद्ध्यै ॥ **4**

**TS 5.1.1.4 - Padam**

आह । समृद्ध्या इति सं – ऋद्ध्यै । चतुभिरिति चतुः – भिः ।

अभ्रिम् । एति । दत्ते । चत्वारि । छन्दाꣳसि ।

छन्दोभिरिति छन्दः – भिः । एव । देवस्य । त्वा । सवितुः । प्रसव

इति प्र – सवे । इति । आह । प्रसूत्या इति प्र – सूत्यै । अग्निः ।

देवेभ्यः । निलायत । सः । वेणुम् । प्रेति । अविशत् । सः । एताम् ।
ऊतिम् । अनु । समिति । अचरत् । यत् । वेणोः । सुषिरम् ।
सुषिरा । अभ्रिः । भवति । सयोनित्वायेति सयोनि – त्वाय । सः ।
यत्रयत्रेति यत्र – यत्र । अवसत् । तत् । कृष्णम् । अभवत् ।
कल्माषी । भवति । रूपसमृद्ध्या इति रूप – समृद्ध्यै ।
उभयतःक्ष्णूरित्युभयतः–क्ष्णूः । भवति । इतः । च ( ) । अमुतः ।
च । अर्कस्य । अवरुद्ध्या इत्यव – रुद्ध्यै । व्याममात्रीति
व्याम – मात्री । भवति । एतावत् । वै । पुरुषे । वीर्यम् ।
वीर्यसम्मितेति वीर्य – सम्मिता । अपरिमितेत्यपरि–मिता । भवति ।
अपरिमितस्येत्यपरि – मितस्य । अवरुद्ध्या इत्यव – रुद्ध्यै । यः ।
वनस्पतीनाम् । फलग्रहिरिति फल – ग्रहिः । सः । एषाम् ।
वीर्यावानिति वीर्य – वान् । फलग्रहिरिति फल – ग्रहिः । वेणुः ।
वैणवी । भवति । वीर्यस्य । अवरुद्ध्या इत्यव – रुद्ध्यै ॥ **4 (77)**

*(कामयेत – गायत्री – ऽर्द्धयेति – च – सप्तविꣳशतिश्च) (A1)*

**TS 5.1.2.1**

व्यृद्धं ँवा एतद्–यज्ञस्य यदयजुष्केण क्रियत इमामगृभ्णन्

रशना–मृतस्येत्यश्वाभिधानीमा दत्ते यजुष्कृत्यै यज्ञस्य समृद्ध्यै प्रतूर्तं

ँवाजिन्ना द्रवेत्यश्वमभि दधाति रूपमेवास्यैतन् महिमानं ँव्याचष्टे

युञ्जाथाꣳ रासभं ँयुवमिति गर्दभमसत्येव गर्दभं प्रति ष्ठापयति

तस्मादश्वाद्–गर्दभोऽसत्तरो योगेयोगे तवस्तरमित्याह – [ ] **5**

**TS 5.1.2.1 - Padam**

व्यृद्धमिति वि – ऋद्धम् । वै । एतत् । यज्ञस्य । यत् ।

अयजुष्केणेत्ययजुः–केन । क्रियते । इमाम् । अगृभ्णन्न् । रशनाम् ।

ऋतस्य । इति । अश्वाभिधानीमित्यश्व – अभिधानीम् । एति । दत्ते ।

यजुष्कृत्या इति यजुः–कृत्यै । यज्ञस्य । समृद्ध्या इति सं–ऋद्ध्यै ।

प्रतूर्तमिति प्र – तूर्तम् । वाजिन्न् । एति । द्रव । इति । अश्वम् ।

अभीति । दधाति । रूपम् । एव । अस्य । एतत् । महिमानम् ।

व्याचष्ट इति वि – आचष्टे । युञ्जाथाम् । रासभम् । युवम् । इति ।

गर्दभम् । असति । एव । गर्दभम् । प्रतीति । स्थापयति । तस्मात् ।

अश्वात् । गर्दभः । असत्तर इत्यसत् – तरः । योगेयोग इति योगे – योगे । तवस्तरमिति तवः – तरम् । इति । आह । **5 (50)**

**TS 5.1.2.2**

योगेयोग एवैनं ँयुङ्क्ते वाजेवाजे हवामह इत्याहान्नं ँवै वाजो– ऽन्नमेवाव रुन्धे सखाय इन्द्रमूतय इत्याहेन्द्रियमेवाव रुन्धे ऽग्निर्देवेभ्यो निलायत तं प्रजापतिरन्वविन्दत् प्राजापत्योऽश्वो ऽश्वेन सं भरत्यनुवित्त्यै पापवस्यसं ँवा एतत् क्रियते यच्छ्रेयसा च पापीयसा च समानं कर्म कुर्वन्ति पापीयान्.– [ ] **6**

**TS 5.1.2.2 - Padam**

योगेयोग इति योगे – योगे । एव । एनम् । युङ्क्ते । वाजेवाज इति वाजे – वाजे । हवामहे । इति । आह । अन्नम् । वै । वाजः । अन्नम् । एव । अवेति । रुन्धे । सखायः । इन्द्रम् । ऊतये । इति । आह । इन्द्रियम् । एव । अवेति । रुन्धे । अग्निः । देवेभ्यः । निलायत । तम् । प्रजापतिरिति प्रजा–पतिः । अन्विति । अविन्दत् । प्राजापत्य इति प्राजा – पत्यः । अश्वः । अश्वेन । समिति । भरति ।

अनुवित्त्या इत्यनु – वित्त्यै । पापवस्यसमिति पाप – वस्यसम् ।

वै । एतत् । क्रियते । यत् । श्रेयसा । च । पापीयसा । च ।

समानम् । कर्म । कुर्वन्ति । पापीयान् । **6 (50)**

**TS 5.1.2.3**

ह्यश्वाद्–गर्दभोऽश्वं पूर्वं नयन्ति पापवस्यसस्य व्यावृत्त्यै

तस्माच्छ्रेया॑ꣳसं पापीयान् पश्चादन्वेति बहुर्वै भवतो भ्रातृव्यो

भवतीव खलु वा एष योऽग्निं चिनुते वज्र्यश्वः प्रतूर्वन्नेह्य–

वक्रामन्न–शस्तीरित्याह वज्रेणैव पाप्मानं भ्रातृव्यमव क्रामति

रुद्रस्य गाणपत्यादित्याह रौद्रा वै पशवो रुद्रादेव– [ ] **7**

**TS 5.1.2.3 - Padam**

हि । अश्वात् । गर्दभः । अश्वम् । पूर्वम् । नयन्ति । पापवस्यसस्येति

पाप – वस्यसस्य । व्यावृत्त्या इति वि – आवृत्त्यै । तस्मात् ।

श्रेया॑ꣳसम् । पापीयान् । पश्चात् । अन्विति । एति । बहुः । वै ।

भवतः । भ्रातृव्यः । भवति । इव । खलु । वै । एषः । यः ।

अग्निम् । चिनुते । वज्री । अश्वः । प्रतूर्वन्निति प्र – तूर्वन्न् । एति ।

इहि । अवक्रामन्नित्यव – क्रामन्न् । अशस्तीः । इति । आह ।

वज्रेण । एव । पाप्मानम् । भ्रातृव्यम् । अवेति । क्रामति । रुद्रस्य ।

गाणपत्यादिति गाण – पत्यात् । इति । आह । रौद्राः । वै । पशवः ।

रुद्रात् । एव । **7 (50)**

**<u>TS 5.1.2.4</u>**

पशून् निर्याच्याऽऽ*त्मने कर्म कुरुते पूष्णा सयुजा सहेत्याह पूषा

वा अद्ध्वना(ग्म्) सन्नेता समष्ट्यै पुरीषायतनो वा एष यदग्निरङ्गिरसो

वा एतमग्रे देवताना(ग्म्) समभरन् पृथिव्याः सधस्थादग्निं पुरीष्य–

मङ्गिरस्व–दच्छेहीत्याह सायतनमेवैनं देवताभिः सं भरत्यग्निं

पुरीष्य–मङ्गिरस्व–दच्छेम इत्याह येन– [ ] **8**

**<u>TS 5.1.2.4 - Padam</u>**

पशून् । निर्याच्येति निः – याच्य । आत्मने । कर्म । कुरुते । पूष्णा ।

सयुजेति स–युजा । सह । इति । आह । पूषा । वै । अद्ध्वनाम् ।

संनेतेति सं – नेता । समष्ट्या इति सं – अष्ट्यै । पुरीषायतन इति

पुरीष – आयतनः । वै । एषः । यत् । अग्निः । अङ्गिरसः । वै ।

एतम् । अग्रे । देवतानाम् । समिति । अभरन्न् । पृथिव्याः ।
सधस्थादिति सध – स्थात् । अग्निम् । पुरीष्यम् । अङ्गिरस्वत् ।
अच्छ । इहि । इति । आह । सायतनमिति स – आयतनम् ।
एव । एनम् । देवताभिः । समिति । भरति । अग्निम् । पुरीष्यम् ।
अङ्गिरस्वत् । अच्छ । इमः । इति । आह । येन । **8 (50)**

**TS 5.1.2.5**

सङ्गच्छते वाजमेवास्य वृङ्क्ते प्रजापतये प्रतिप्रोच्याग्निः सम्भृत्य
इत्याहुरियं ँवै प्रजापतिस्तस्या एतच्छ्रोत्रं ँयद्वल्मीकोऽग्निं पुरीष्य-
मङ्गिरस्वद्–भरिष्याम इति वल्मीकवपामुप तिष्ठते साक्षादेव
प्रजापतये प्रतिप्रोच्याऽग्निꣳ सं भरत्यग्निं पुरीष्य–मङ्गिरस्वद्–भराम
इत्याह येन संगच्छते वाजमेवास्य वृङ्क्ते ऽन्वग्निरुषसामग्र– [ ] **9**

**TS 5.1.2.5 - Padam**

संगच्छत इति सं – गच्छते । वाजम् । एव । अस्य । वृङ्क्ते ।
प्रजापतय इति प्रजा–पतये । प्रतिप्रोच्येति प्रति – प्रोच्य । अग्निः ।

संभृत्य इति सं – भृत्यः । इति । आहुः । इयम् । वै । प्रजापतिरिति
प्रजा–पतिः । तस्याः । एतत् । श्रोत्रम् । यत् । वल्मीकः । अग्निम् ।
पुरीष्यम् । अङ्गिरस्वत् । भरिष्यामः । इति । वल्मीकवपामिति
वल्मीक – वपाम् । उपेति । तिष्ठते । साक्षादिति स–अक्षात् । एव ।
प्रजापतय इति प्रजा – पतये । प्रतिप्रोच्येति प्रति – प्रोच्य ।
अग्निम् । समिति । भरति । अग्निम् । पुरीष्यम् । अङ्गिरस्वत् ।
भरामः । इति । आह । येन । संगच्छत इति सं–गच्छते । वाजम् ।
एव । अस्य । वृङ्क्ते । अन्विति । अग्निः । उषसाम् । अग्रम् । **9 (50)**

**TS 5.1.2.6**

मख्यदित्याहानुख्यात्या आगत्य वाज्यद्ध्वन आक्रम्य वाजिन्
पृथिवीमित्याहेच्छत्येवैनं पूर्वया विन्दत्युत्तरया द्वाभ्यामा क्रमयति
प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः प्र जायन्ते द्यौस्ते पृष्ठं
पृथिवी सधस्थमित्याहैभ्यो वा एतं ँल्लोकेभ्यः प्रजापतिः समैरयद्
रूपमेवास्यैतन्महिमानं ँव्याचष्टे वज्री वा ( ) एष यदश्वो

दद्भि–रन्यतोदद्भ्यो भूयान् ँलोमभिरुभयाददद्भ्यो यं द्विष्यात्

तमधस्पदं ध्यायेद्–वज्रेणैवैनꣳ स्तृणुते ॥ **10**

**TS 5.1.2.6 - Padam**

अख्यत् । इति । आह । अनुख्यात्या इत्यनु – ख्यात्यै ।

आगत्येत्या – गत्य । वाजी । अद्ध्वनः । आक्रम्येत्या – क्रम्य ।

वाजिन्न् । पृथिवीम् । इति । आह । इच्छति । एव । एनम् । पूर्वया ।

विन्दति । उत्तरयेत्युत् – तरया । द्वाभ्याम् । एति । क्रमयति ।

प्रतिष्ठित्या इति प्रति – स्थित्यै । अनुरूपाभ्यामित्यनु – रूपाभ्याम् ।

तस्मात् । अनुरूपा इत्यनु–रूपाः । पशवः । प्रेति । जायन्ते । द्यौः ।

ते । पृष्ठम् । पृथिवी । सधस्थमिति सध – स्थम् । इति । आह ।

एभ्यः । वै । एतम् । लोकेभ्यः । प्रजापतिरिति प्रजा – पतिः ।

समिति । ऐरयत् । रूपम् । एव । अस्य । एतत् । महिमानम् ।

व्याचष्ट इति वि – आचष्टे । वज्री । वै ( ) । एषः । यत् । अश्वः ।

दद्भिरिति दत् – भिः । अन्यतोदद्भ्य इत्यन्यतोदत्–भ्यः । भूयान् ।

लोमभिरिति लोम–भिः । उभयाददद्भ्य इत्युभयादत् – भ्यः । यम् ।

द्विष्यात् । तम् । अधस्पदमित्यधः – पदम् । ध्यायेत् । वज्रेण । एव । एनम् । स्तृणुते ॥ **10 (67)** ***(आह – पापीयान् – रुद्रादेव – येना – ग्रं – वँज्री वै – सप्त दश च)*** *(A2)*

**TS 5.1.3.1**

उत्क्रामोदक्रमीदिति द्वाभ्यामुत्क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः प्र जायन्त ऽप उप सृजति यत्र वा आप उपगच्छन्ति तदोषधयः प्रति तिष्ठन्त्योषधीः प्रतितिष्ठन्तीः पशवोऽनु प्रति तिष्ठन्ति पशून्. यज्ञो यज्ञं यँजमानो यजमानं प्रजास्तस्मादप उप सृजति प्रतिष्ठित्यै यदद्ध्वर्यु–रनग्नावाहुतिं जुहुयादन्धो ऽद्ध्वर्युः–[ ] **11**

**TS 5.1.3.1 - Padam**

उदिति । क्राम । उदिति । अक्रमीत् । इति । द्वाभ्याम् । उदिति । क्रमयति । प्रतिष्ठित्या इति प्रति – स्थित्यै । अनुरूपाभ्यामित्यनु–रूपाभ्याम् । तस्मात् । अनुरूपा इत्यनु–रूपाः । पशवः । प्रेति । जायन्ते । अपः । उपेति । सृजति । यत्र । वै ।

आपः । उपगच्छन्तीत्युप – गच्छन्ति । तत् । ओषधयः । प्रतीति ।
तिष्ठन्ति । ओषधीः । प्रतितिष्ठन्तीरिति प्रति – तिष्ठन्तीः । पशवः ।
अनु । प्रतीति । तिष्ठन्ति । पशून् । यज्ञः । यज्ञम् । यजमानः ।
यजमानम् । प्रजा इति प्र–जाः । तस्मात् । अपः । उपेति । सृजति ।
प्रतिष्ठित्या इति प्रति – स्थित्यै । यत् । अद्ध्वर्युः । अनग्नौ ।
आहुतिमित्या – हुतिम् । जुहुयात् । अन्धः । अद्ध्वर्युः । **11 (50)**

**TS 5.1.3.2**

स्याद्–रक्षाꣳसि यज्ञꣳ हन्युर्. हिरण्यमुपास्य जुहोत्यग्निवत्येव
जुहोति नान्धो–ऽद्ध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति जिघर्म्यग्निं
मनसा घृतेनेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति प्रतिक्ष्यन्तं
भुवनानि विश्वेत्याह सर्वꣳ ह्येष प्रत्यङ् क्षेति पृथुं तिरश्चा वयसा
बृहन्तमित्याहाऽल्पो ह्येष जातो महान् –[ ] **12**

**TS 5.1.3.2 - Padam**

स्यात् । रक्षाꣳसि । यज्ञम् । हन्युः । हिरण्यम् ।
उपास्येत्युप – अस्य । जुहोति । अग्निवतीत्यग्नि – वति । एव ।

जुहोति । न । अन्धः । अद्ध्वर्युः । भवति । न । यज्ञम् । रक्षाꣳसि । घ्नन्ति । जिघर्मि । अग्निम् । मनसा । घृतेन । इति । आह । मनसा । हि । पुरुषः । यज्ञम् । अभिगच्छतीत्यभि – गच्छति । प्रतिक्ष्यन्तमिति प्रति – क्ष्यन्तम् । भुवनानि । विश्वा । इति । आह । सर्वम् । हि । एषः । प्रत्यङ् । क्षेति । पृथुम् । तिरश्चा । वयसा । बृहन्तम् । इति । आह । अल्पः । हि । एषः । जातः । महान् । **12 (50)**

**TS 5.1.3.3**

भवति व्यचिष्ठमन्नꣳ रभसं ँविदानमित्याहा ऽन्नमेवाऽस्मै स्वदयति सर्वमस्मै स्वदते य एवं ँवेदाऽऽ त्वा जिघर्मि वचसा घृतेनेत्याह तस्माद्–यत् पुरुषो मनसा–ऽभिगच्छति तद्–वाचा वदत्यरक्षसेत्याह रक्षसामपहत्यै मर्यश्रीः स्पृहयद्वर्णो अग्निरित्याहा–पचितिमेवा–ऽस्मिन् दधात्य–पचितिमान् भवति य एवं –[ ] **13**

**TS 5.1.3.3 - Padam**

भवति । व्यचिष्ठम् । अन्नम् । रभसम् । विदानम् । इति । आह । अन्नम् । एव । अस्मै । स्वदयति । सर्वम् । अस्मै । स्वदते । यः ।

एवम् । वेद । एति । त्वा । जिघर्मि । वचसा । घृतेन । इति । आह ।
तस्मात् । यत् । पुरुषः । मनसा । अभिगच्छतीत्यभि – गच्छति ।
तत् । वाचा । वदति । अरक्षसा । इति । आह । रक्षसाम् । अपहत्या
इत्यप – हत्यै । मर्यश्रीरिति मर्य – श्रीः । स्पृहयद्वर्ण इति
स्पृहयत्–वर्णः । अग्निः । इति । आह । अपचितिमित्यप–चितिम् ।
एव । अस्मिन्न् । दधाति । अपचितिमानित्यपचिति – मान् । भवति ।
यः । एवम् । **13 (50)**

**TS 5.1.3.4**

वेद मनसा त्वै तामाप्तुमर्.हति यामद्ध्वर्यु–रनग्नावाहुतिं जुहोति
मनस्वतीभ्यां जुहोत्याहुत्योराप्त्यै द्वाभ्यां प्रतिष्ठित्यै यज्ञमुखेयज्ञमुखे वै
क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्त्येतर्.हि खलु वा एतद्–
यज्ञमुखं यर्.ह्येनदाहुतिरश्ञुते परि लिखति रक्षसामपहत्यै तिसृभिः
परि लिखति त्रिवृद्धा अग्निर्यावानेवा–ऽग्निस्तस्माद्–रक्षाꣳस्यप
हन्ति– [ ] **14**

**TS 5.1.3.4 - Padam**

वेद । मनसा । तु । वै । ताम् । आप्तुम् । अर्.हति । याम् ।
अद्ध्वर्युः । अनग्नौ । आहुतिमित्या – हुतिम् । जुहोति ।
मनस्वतीभ्याम् । जुहोति । आहुत्योरित्या – हुत्योः । आप्त्यै ।
द्वाभ्याम् । प्रतिष्ठित्या इति प्रति – स्थित्यै । यज्ञमुखेयज्ञमुख इति
यज्ञमुखे – यज्ञमुखे । वै । क्रियमाणे । यज्ञम् । रक्षाꣳसि ।
जिघाꣳसन्ति । एतर्.हि । खलु । वै । एतत् । यज्ञमुखमिति
यज्ञ – मुखम् । यर्.हि । एनत् । आहुतिरित्या – हुतिः । अश्नुते ।
परीति । लिखति । रक्षसाम् । अपहत्या इत्यप – हत्यै । तिसृभिरिति
तिसृ – भिः । परीति । लिखति । त्रिवृदिति त्रि – वृत् । वै । अग्निः ।
यावान् । एव । अग्निः । तस्मात् । रक्षाꣳसि ।
अपेति । हन्ति । **14 (50)**

**TS 5.1.3.5**

गायत्रिया परि लिखति तेजो वै गायत्री तेजसैवैनं परि गृह्णाति त्रिष्टुभा
परि लिखतीन्द्रियं वै त्रिष्टुगिन्द्रियेणैवैनं परि गृह्णात्यनुष्टुभा परि

लिखत्यनुष्टुफ् सर्वाणि छन्दाꣳसि परिभूः पर्याप्त्यै मद्ध्यतोऽनुष्टुभा

वाग्वा अनुष्टुप् तस्मान् मद्ध्यतो वाचा वदामो गायत्रिया प्रथमया परि

लिखत्यथा–ऽनुष्टुभा ऽथ त्रिष्टुभा तेजो वै गायत्री ( ) यज्ञो

ऽनुष्टुगिन्द्रियं त्रिष्टुप् तेजसा चैवेन्द्रियेण चोभयतो यज्ञं परि

गृह्णाति ॥ 15

**TS 5.1.3.5 - Padam**

गायत्रिया । परीति । लिखति । तेजः । वै । गायत्री । तेजसा । एव ।

एनम् । परीति । गृह्णाति । त्रिष्टुभा । परीति । लिखति । इन्द्रियम् ।

वै । त्रिष्टुक् । इन्द्रियेण । एव । एनम् । परीति । गृह्णाति ।

अनुष्टुभेत्यनु – स्तुभा । परीति । लिखति । अनुष्टुबित्यनु – स्तुप् ।

सर्वाणि । छन्दाꣳसि । परिभूरिति परि – भूः । पर्याप्त्या इति

परि – आप्त्यै । मद्ध्यतः । अनुष्टुभेत्यनु – स्तुभा । वाक् । वै ।

अनुष्टुबित्यनु – स्तुप् । तस्मात् । मद्ध्यतः । वाचा । वदामः ।

गायत्रिया । प्रथमया । परीति । लिखति । अथ ।

अनुष्टुभेत्यनु – स्तुभा । अथ । त्रिष्टुभा । तेजः । वै । गायत्री ( ) ।

यज्ञः । अनुष्टुगित्यनु – स्तुक् । इन्द्रियम् । त्रिष्टुप् । तेजसा । च ।
एव । इन्द्रियेण । च । उभयतः । यज्ञम् । परीति । गृह्णाति ॥ **15 (63)**

*(अन्धोऽदध्वर्यु – र्महान् – भवति य एवं – हन्ति – त्रिष्टुभा तेजो वै गायत्री – त्रयोदश च) (A3)*

**TS 5.1.4.1**

देवस्य त्वा सवितुः प्रसव इति खनति प्रसूत्या अथो धूममेवैतेन जनयति ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमित्याह ज्योतिरेवैतेन जनयति सोऽग्निर्जातः प्रजाः शुचा ऽऽर्पयत् तं देवा अर्द्धर्चेना–शमयञ्छिवं प्रजाभ्यो ऽहिꣳसन्तमित्याह प्रजाभ्य एवैनꣳ शमयति द्वाभ्यां खनति प्रतिष्ठित्या अपां पृष्ठमसीति पुष्करपर्णमा – [ ] **16**

**TS 5.1.4.1 - Padam**

देवस्य । त्वा । सवितुः । प्रसव इति प्र – सवे । इति । खनति ।
प्रसूत्या इति प्र – सूत्यै । अथो इति । धूमम् । एव । एतेन ।
जनयति । ज्योतिष्मन्तम् । त्वा । अग्ने । सुप्रतीकमिति
सु – प्रतीकम् । इति । आह । ज्योतिः । एव । एतेन ।

जनयति । सः । अग्निः । जातः । प्रजा इति प्र – जाः । शुचा । आर्पयत् । तम् । देवाः । अर्द्धर्चेनेत्यर्द्ध – ऋचेन । अशमयन्न् । शिवम् । प्रजाभ्य इति प्र – जाभ्यः । अहि॒ꣳसन्तम् । इति । आह । प्रजाभ्य इति प्र – जाभ्यः । एव । एनम् । शमयति । द्वाभ्याम् । खनति । प्रतिष्ठित्या इति प्रति – स्थित्यै । अपाम् । पृष्ठम् । असि । इति । पुष्करपर्णमिति पुष्कर – पर्णम् । एति । **16 (50)**

**TS 5.1.4.2**

हरत्यपां ँवा एतत् पृष्ठं ँयत् पुष्करपर्णꣳ रूपेणैवैनदा हरति पुष्करपर्णेन सं भरति योनिर्वा अग्नेः पुष्करपर्णꣳ सयोनिमेवाग्निꣳ सं भरति कृष्णाजिनेन सं भरति यज्ञो वै कृष्णाजिनं ँयज्ञेनैव यज्ञꣳ सं भरति यद् ग्राम्याणां पशूनां चर्मणा संभरेद् ग्राम्यान् पशूञ्छुचा ऽर्पयेत् कृष्णाजिनेन सं भरत्यारण्यानेव पशू –[ ] **17**

**TS 5.1.4.2 - Padam**

हरति । अपाम् । वै । एतत् । पृष्ठम् । यत् । पुष्करपर्णमिति पुष्कर – पर्णम् । रूपेण । एव । एनत् । एति । हरति ।

पुष्करपर्णेनेति पुष्कर – पर्णेन । समिति । भरति । योनिः । वै ।
अग्नेः । पुष्करपर्णमिति पुष्कर – पर्णम् । सयोनिमिति स–योनिम् ।
एव । अग्निम् । समिति । भरति । कृष्णाजिनेनेति कृष्ण–अजिनेन ।
समिति । भरति । यज्ञः । वै । कृष्णाजिनमिति कृष्ण – अजिनम् ।
यज्ञेन । एव । यज्ञम् । समिति । भरति । यत् । ग्राम्याणाम् ।
पशूनाम् । चर्मणा । संभरेदिति सं – भरेत् । ग्राम्यान् । पशून् ।
शुचा । अर्पयेत् । कृष्णाजिनेनेति कृष्ण – अजिनेन । समिति ।
भरति । आरण्यान् । एव । पशून् । **17 (50)**

**<u>TS 5.1.4.3</u>**

ऽशुचा ऽर्पयति तस्माथ् समावत् पशूनां प्रजायमानाना–मारण्याः
पशवः कनीयाꣳसः शुचा ह्यृता लोमतः सं भरत्यतो ह्यस्य मेद्ध्यं
कृष्णाजिनं च पुष्करपर्णं च सꣳ स्तृणातीयं ँवै कृष्णाजिनमसौ
पुष्करपर्ण–माभ्या–मेवैन–मुभयतः परि गृह्णात्यग्निर्देवेभ्यो निलायत
तमथर्वा ऽन्वपश्यदथर्वा त्वा प्रथमो निरमन्थदग्न इत्या– [ ] **18**

**TS 5.1.4.3 - Padam**

शुचा । अर्पयति । तस्मात् । समावत् । पशूनाम् । प्रजायमानानामिति प्र–जायमानानाम् । आरण्याः । पशवः । कनीया७ँसः । शुचा । हि । ऋताः । लोमतः । समिति । भरति । अतः । हि । अस्य । मेद्ध्यम् । कृष्णाजिनमिति कृष्ण – अजिनम् । च । पुष्करपर्णमिति पुष्कर – पर्णम् । च । समिति । स्तृणाति । इयम् । वै । कृष्णाजिनमिति कृष्ण – अजिनम् । असौ । पुष्करपर्णमिति पुष्कर – पर्णम् । आभ्याम् । एव । एनम् । उभयतः । परीति । गृह्णाति । अग्निः । देवेभ्यः । निलायत । तम् । अथर्वा । अन्विति । अपश्यत् । अथर्वा । त्वा । प्रथमः । निरिति । अमन्थत् । अग्ने । इति । **18 (50)**

**TS 5.1.4.4**

–ह य एवैनमन्वपश्यत् तेनैवैन७ँ सं भरति त्वामग्ने पुष्करादधीत्याह पुष्करपर्णे ह्येनमुपश्रित–मविन्दत् तमु त्वा दद्ध्यङ्ङृषिरित्याह

दद्ध्यङ् वा आथर्वण–स्तेजस्व्यासीत् तेज एवास्मिन् दधाति तमु

त्वा पाथ्यो वृषेत्याह पूर्वमेवोदित–मुत्तरेणाभि गृणाति – [ ] **19**

**TS 5.1.4.4 - Padam**

आह । यः । एव । एनम् । अन्वपश्यदित्यनु–अपश्यत् । तेन । एव ।

एनम् । समिति । भरति । त्वाम् । अग्ने । पुष्करात् । अधीति ।

इति । आह । पुष्करपर्ण इति पुष्कर – पर्णे । हि । एनम् ।

उपश्रितमित्युप – श्रितम् । अविन्दत् । तम् । उ । त्वा । दद्ध्यङ् ।

ऋषिः । इति । आह । दद्ध्यङ् । वै । आथर्वणः । तेजस्वी ।

आसीत् । तेजः । एव । अस्मिन्न् । दधाति । तम् । उ । त्वा ।

पाथ्यः । वृषा । इति । आह । पूर्वम् । एव । उदितम् ।

उत्तरेणेत्युत् – तरेण । अभीति । गृणाति । **19 (50)**

**TS 5.1.4.5**

चतसृभिः सं भरति चत्वारि छन्दाꣳसि छन्दोभिरेव गायत्रीभिर्ब्राह्मणस्य

गायत्रो हि ब्राह्मण–स्त्रिष्टुग्भी राजन्यस्य त्रैष्टुभो हि राजन्यो यं

कामयेत वसीयान्थ्–स्यादित्युभयीभिस्तस्य सं भरेत् तेजश्चैवाऽस्मा

इन्द्रियं च समीची दधात्यष्टाभिः सं भरत्यष्टाक्षरा गायत्री गायत्रो ऽग्निर्यावानेवाऽग्निस्तꣳ सं भरति सीद होतरित्या– ( ) –ह देवता एवास्मै सꣳ सादयति नि होतेति मनुष्यान्थ् सꣳ सीदस्वेति वयाꣳसि जनिष्वा हि जेन्यो अग्रे अह्नामित्याह देवमनुष्यानेवास्मै सꣳसन्नान् प्र जनयति ॥ 20

**TS 5.1.4.5 - Padam**

चतसृभिरिति चतसृ–भिः । समिति । भरति । चत्वारि । छन्दाꣳसि । छन्दोभिरिति छन्दः–भिः । एव । गायत्रीभिः । ब्राह्मणस्य । गायत्रः । हि । ब्राह्मणः । त्रिष्टुग्भिरिति त्रिष्टुक् – भिः । राजन्यस्य । त्रैष्टुभः । हि । राजन्यः । यम् । कामयेत । वसीयान् । स्यात् । इति । उभयीभिः । तस्य । समिति । भरेत् । तेजः । च । एव । अस्मै । इन्द्रियम् । च । समीची इति । दधाति । अष्टाभिः । समिति । भरति । अष्टाक्षरेत्यष्टा – अक्षरा । गायत्री । गायत्रः । अग्निः । यावान् । एव । अग्निः । तम् । समिति । भरति । सीद । होतः । इति ( ) । आह । देवताः । एव । अस्मै । समिति । सादयति ।

नीति । होता । इति । मनुष्यान् । समिति । सीदस्व । इति ।
वया॑ꣳसि । जनिष्व । हि । जेन्यः । अग्रे । अह्नाम् । इति । आह ।
देवमनुष्यानिति देव – मनुष्यान् । एव । अस्मै । सꣳसन्नानिति
सं – सन्नान् । प्रेति । जनयति ॥ **20 (77)** *(ऐ – व पशू – निति – गृणाति – होतरिति – सप्तविꣳशतिश्च) (A4)*

**TS 5.1.5.1**

क्रूरमिव वा अस्या एतत् करोति यत् खनत्यप उप सृजत्यापो वै
शान्ताः शान्ताभिरेवाऽस्यै शुचꣳ शमयति सं ते वायुर्मातरिश्वा
दधात्वित्याह प्राणो वै वायुः प्राणेनैवास्यै प्राणꣳ सं दधाति सं ते
वायुरित्याह तस्माद्–वायुप्रच्युता दिवो वृष्टिरीर्ते तस्मै च देवि
वषडस्तु– [ ] **21**

**TS 5.1.5.1 - Padam**

क्रूरम् । इव । वै । अस्याः । एतत् । करोति । यत् । खनति । अपः ।
उपेति । सृजति । आपः । वै । शान्ताः । शान्ताभिः । एव । अस्यै ।
शुचम् । शमयति । समिति । ते । वायुः । मातरिश्वा । दधातु । इति ।

आह । प्राण इति प्र – अनः । वै । वायुः । प्राणेनेति प्र – अनेन । एव । अस्यै । प्राणमिति प्र – अनम् । समिति । दधाति । समिति । ते । वायुः । इति । आह । तस्मात् । वायुप्रच्युतेति वायु – प्रच्युता । दिवः । वृष्टिः । ईर्ते । तस्मै । च । देवि । वषट् । अस्तु । **21 (50)**

**TS 5.1.5.2**

तुभ्यमित्याह षड्वा ऋतव ऋतुष्वेव वृष्टिं दधाति तस्माथ् सर्वानृतून्. वर्.षति यद्–वषट्कुर्याद्–यातयामाऽस्य वषट्कारः स्याद्यन्न वषट्कुर्याद् रक्षा॑ंसि यज्ञ॑ं हन्युर्वडित्याह परोक्षमेव वषट् करोति नास्य यातयामा वषट्कारो भवति न यज्ञ॑ं रक्षा॑ंसि घ्नन्ति सुजातो ज्योतिषा सहेत्यनुष्टुभोप नह्यत्यनुष्टु–[ ] **22**

**TS 5.1.5.2 - Padam**

तुभ्यम् । इति । आह । षट् । वै । ऋतवः । ऋतुषु । एव । वृष्टिम् । दधाति । तस्मात् । सर्वान् । ऋतून् । वर्.षति । यत् । वषट्कुर्यादिति वषट् – कुर्यात् । यातयामेति यात – यामा । अस्य । वषट्कार इति वषट् – कारः । स्यात् । यत् । न । वषट्कुर्यादिति वषट् – कुर्यात् ।

रक्षा॑ꣳसि । य॒ज्ञम् । ह॒न्यु॒ः । वट् । इति॑ । आ॒ह॒ । प॒रो॒क्षमिति॑

परः – अ॒क्षम् । ए॒व । वष॑ट् । क॒रो॒ति॒ । न । अ॒स्य॒ । या॒तया॒मेति॑

या॒त – या॒मा॒ । व॒ष॒ट्का॒र इति॑ वष॑ट् – का॒रः । भव॑ति । न । य॒ज्ञम् ।

रक्षा॑ꣳसि । घ्न॒न्ति॒ । सु॒जा॒त इति॑ सु – जा॒तः । ज्योति॑षा । स॒ह ।

इति॑ । अ॒नु॒ष्टुभेत्य॑नु – स्तुभा॒ । उपेति॑ । न॒ह्य॒ति॒ ।

अ॒नु॒ष्टुबित्य॑नु – स्तुप् । **22 (50)**

**<u>TS 5.1.5.3</u>**

–फ्सर्वा॑णि॒ छन्दा॑ꣳसि॒ छन्दा॑ꣳसि॒ खलु॒ वा अ॒ग्नेः प्रि॒या त॒नूः

प्रि॒यय॒वैनं॑ त॒नु॒वा॒ परि॑ दधाति॒ वेदु॑को॒ वासो॑ भवति॒ य ए॒वं ँवेद॑ वारु॒णो

वा अ॒ग्निरुप॑नद्ध॒ उदु॑ तिष्ठ स्वद्ध्वरो॒र्द्ध्व ऊ॒ षुण ऊ॒तय॒ इति॑

सावि॒त्रीभ्या॒मुत् ति॑ष्ठति सवि॒तृप्र॑सूत ए॒वास्यो॒र्द्ध्वां ँव॑रुणमे॒निमुथ्

सृ॑जति॒ द्वाभ्या॒ं प्रति॑ष्ठित्यै॒ स जा॒तो गर्भो॑ अ॒सि– [ ] **23**

**<u>TS 5.1.5.3 - Padam</u>**

सर्वा॑णि । छन्दा॑ꣳसि । छन्दा॑ꣳसि । खलु॑ । वै । अ॒ग्नेः । प्रि॒या ।

त॒नूः । प्रि॒यया॑ । ए॒व । ए॒न॒म् । त॒नु॒वा॑ । परीति॑ । द॒धा॒ति॒ । वेदु॑कः ।

वासः । भवति । यः । एवम् । वेद । वारुणः । वै । अग्निः । उपनद्ध इत्युप – नद्धः । उदिति । उ । तिष्ठ । स्वद्ध्वरेति सु – अद्ध्वर । ऊर्द्ध्वः । उ । स्विति । नः । ऊतये । इति । सावित्रीभ्याम् । उदिति । तिष्ठति । सवितृप्रसूत इति सवितृ – प्रसूतः । एव । अस्य । ऊर्द्ध्वाम् । वरुणमेनिमिति वरुण – मेनिम् । उदिति । सृजति । द्वाभ्याम् । प्रतिष्ठित्या इति प्रति – स्थित्यै । सः । जातः । गर्भः । असि । **23 (50)**

**TS 5.1.5.4**

रोदस्योरित्याहेमे वै रोदसी तयोरेष गर्भो यदग्नि–स्तस्मा–देवमाहाग्ने चारुर्विभृत ओषधीष्वित्याह यदा ह्येतं ँविभरन्त्यथ चारुतरो भवति प्र मातृभ्यो अधि कनिक्रदद्–गा इत्याहौषधयो वा अस्य मातरस्ताभ्य एवैनं प्र च्यावयति स्थिरो भव वीड्वङ्ग इति गर्दभ आ सादयति–[ ] **24**

**TS 5.1.5.4 - Padam**

रोदस्योः । इति । आह । इमे इति । वै । रोदसी इति । तयोः ।

एषः । गर्भः । यत् । अग्निः । तस्मात् । एवम् । आह । अग्ने ।

चारुः । विभृत इति वि – भृतः । ओषधीषु । इति । आह । यदा ।

हि । एतम् । विभरन्तीति वि – भरन्ति । अथ । चारुतर इति

चारु – तरः । भवति । प्रेति । मातृभ्य इति मातृ – भ्यः । अधीति ।

कनिक्रदत् । गाः । इति । आह । ओषधयः । वै । अस्य । मातरः ।

ताभ्यः । एव । एनम् । प्रेति । च्यावयति । स्थिरः । भव । वीड्वङ्ग

इति वीडु – अङ्गः । इति । गर्दभे । एति । सादयति । **24 (50)**

**TS 5.1.5.5**

सं नह्यत्येवैनमेतया स्थेम्ने गर्दभेन सं भरति तस्माद् गर्दभः पशूनां

भारभारितमो गर्दभेन सं भरति तस्माद् गर्दभो–ऽप्यनालेशे–ऽत्यन्यान्

पशून् मेद्यत्यन्न७ ह्येनेनाऽर्क७ सं भरन्ति गर्दभेन संभरति तस्माद्

गर्दभो द्विरेताः सन् कनिष्ठं पशूनां प्र जायतेऽग्निर् ह्यस्य योनिं

निर्दहति प्रजासु वा एष एतर्ह्यारूढः– [ ] **25**

**TS 5.1.5.5 - Padam**

समिति । नह्यति । एव । एनम् । एतया । स्थेम्ने । गर्दभेन ।
समिति । भरति । तस्मात् । गर्दभः । पशूनाम् । भारभारितम इति
भारभारि – तमः । गर्दभेन । समिति । भरति । तस्मात् । गर्दभः ।
अपीति । अनालेश इत्यना – लेशे । अतीति । अन्यान् । पशून् ।
मेद्यति । अन्नम् । हि । एनेन । अर्कम् । संभरन्तीति सं – भरन्ति ।
गर्दभेन । समिति । भरति । तस्मात् । गर्दभः ।
द्विरेता इति द्वि–रेताः । सन्न् । कनिष्ठम् । पशूनाम् । प्रेति । जायते ।
अग्निः । हि । अस्य । योनिम् । निर्दहतीति निः – दहति ।
प्रजास्विति प्र – जासु । वै । एषः । एतर्.हि ।
आरूढ इत्या – रूढः । **25 (50)**

**TS 5.1.5.6**

स ईश्वरः प्रजाः शुचा प्रदहः शिवो भव प्रजाभ्य इत्याह प्रजाभ्य
एवैनꣳ शमयति मानुषीभ्यस्त्वमङ्गिर इत्याह मानव्यो हि प्रजा मा
द्यावापृथिवी अभि शूशुचो मा ऽन्तरिक्षं मा वनस्पतीनित्याहैभ्य एवैनं

ँल्लोकेभ्यः शमयति प्रैतु वाजी कनिक्रददित्याह वाजी ह्येष नानदद्–रासभः पत्वेत्या– [ ] **26**

## TS 5.1.5.6 - Padam

सः । ईश्वरः । प्रजा इति प्र – जाः । शुचा । प्रदह इति प्र–दहः । शिवः । भव । प्रजाभ्य इति प्र – जाभ्यः । इति । आह । प्रजाभ्य इति प्र – जाभ्यः । एव । एनम् । शमयति । मानुषीभ्यः । त्वम् । अङ्गिरः । इति । आह । मानव्यः । हि । प्रजा इति प्र – जाः । मा । द्यावापृथिवी इति द्यावा – पृथिवी । अभीति । शूशुचः । मा । अन्तरिक्षम् । मा । वनस्पतीन् । इति । आह । एभ्यः । एव । एनम् । लोकेभ्यः । शमयति । प्रेति । एतु । वाजी । कनिक्रदत् । इति । आह । वाजी । हि । एषः । नानदत् । रासभः । पत्वा । इति । **26 (50)**

## TS 5.1.5.7

–ह रासभ इति ह्येतमृषयोऽवदन् भरन्नग्निं पुरीष्यमित्याहाऽग्नि७ ह्येष भरति मा पाद्यायुषः पुरेत्याहाऽऽयुरेवाऽस्मिन् दधाति तस्माद्

गर्दभः सर्वमायुरेति तस्माद् गर्दभे पुरा ऽऽयुषः प्रमीते बिभ्यति
वृषाऽग्निं ँवृषणं भरन्नित्याह वृषा ह्येष वृषाऽग्निरपां गर्भ७ं–[ ] **27**

**TS 5.1.5.7 - Padam**

आह । रासभः । इति । हि । एतम् । ऋषयः । अवदन्न् । भरन्न् ।
अग्निम् । पुरीष्यम् । इति । आह । अग्निम् । हि । एषः । भरति ।
मा । पादि । आयुषः । पुरा । इति । आह । आयुः । एव ।
अस्मिन्न् । दधाति । तस्मात् । गर्दभः । सर्वम् । आयुः । एति ।
तस्मात् । गर्दभे । पुरा । आयुषः । प्रमीत इति प्र–मीते । बिभ्यति ।
वृषा । अग्निम् । वृषणम् । भरन्न् । इति । आह । वृषा । हि । एषः ।
वृषा । अग्निः । अपाम् । गर्भम् । **27 (50)**

**TS 5.1.5.8**

समुद्रिय–मित्याहाऽपा७ ह्येष गर्भो यदग्निरग्न आ याहि वीतय इति
वा इमौ लोकौ व्यैतामग्न आ याहि वीतय इति यदाहाऽनयोर्लोकयो–
र्वीत्यै प्रच्युतो वा एष आयतनादगतः प्रतिष्ठा७ं स एतर्ह्यध्वर्युं च
यजमानं च ध्यायत्यृत७ं सत्यमित्याहेयं ँवा ऋतमसौ– [ ] **28**

**TS 5.1.5.8 - Padam**

समुद्रियम् । इति । आह । अपाम् । हि । एषः । गर्भः । यत् ।
अग्निः । अग्ने । एति । याहि । वीतये । इति । वै । इमौ । लोकौ ।
वीति । ऐताम् । अग्ने । एति । याहि । वीतये । इति । यत् । आह ।
अनयोः । लोकयोः । वीत्या इति वि – इत्यै । प्रच्युत इति
प्र – च्युतः । वै । एषः । आयतनादित्या – यतनात् । अगतः ।
प्रतिष्ठामिति प्रति – स्थाम् । सः । एतर्.हि । अद्ध्वर्युम् ।
च । यजमानम् । च । ध्यायति । ऋतम् । सत्यम् । इति । आह ।
इयम् । वै । ऋतम् । असौ । **28 (50)**

**TS 5.1.5.9**

सत्यमनयोरेवैनं प्रति ष्ठापयति नाऽऽर्तिमार्च्छत्यद्ध्वर्युर्न यजमानो
वरुणो वा एष यजमानमभ्यैति यदग्निरुपनद्ध ओषधयः प्रति
गृह्णीताग्निमेत–मित्याह शान्त्यै व्यस्यन् विश्वा अमतीरराती–रित्याह
रक्षसामपहत्यै निषीदन् नो अप दुर्मतिं हनदित्याह प्रतिष्ठित्या
ओषधयः प्रति मोदद्ध्व– [ ] **29**

**TS 5.1.5.9 - Padam**

सत्यम् । अनयोः । एव । एनम् । प्रतीति । स्थापयति । न । आर्तिम् ।

एति । ऋच्छति । अद्ध्वर्युः । न । यजमानः । वरुणः । वै । एषः ।

यजमानम् । अभि । एति । एति । यत् । अग्निः । उपनद्ध

इत्युप – नद्धः । ओषधयः । प्रतीति । गृह्णीत । अग्निम् । एतम् ।

इति । आह । शान्त्यै । व्यस्यन्निति वि – अस्यन्न् । विश्वाः ।

अमतीः । अरातीः । इति । आह । रक्षसाम् ।

अपहत्या इत्यप – हत्यै । निषीदन्निति नि–सीदन्न् । नः । अपेति ।

दुर्मतिमिति दुः – मतिम् । हनत् । इति । आह । प्रतिष्ठित्या इति

प्रति – स्थित्यै । ओषधयः । प्रतीति । मोदद्ध्वम् । **29 (50)**

**TS 5.1.5.10**

मेनमित्याहौषधयो वा अग्नेर्भागधेयं ताभिरेवैन७ं समर्द्धयति

पुष्पावतीः सुपिप्पला इत्याह तस्मादोषधयः फलं गृह्णन्त्ययं ँवो गर्भ

ऋत्वियः प्रत्न७ं सधस्थमा–ऽसददित्याह याभ्य एवैनं प्रच्यावयति

तास्वेवैनं प्रति ष्ठापयति द्वाभ्यामुपावहरति प्रतिष्ठित्यै ॥ **30**

**TS 5.1.5.10 - Padam**

एनम् । इति । आह । ओषधयः । वै । अग्नेः । भागधेयमिति

भाग – धेयम् । ताभिः । एव । एनम् । समिति । अर्द्धयति ।

पुष्पावतीरिति पुष्प – वतीः । सुपिप्पला इति सु–पिप्पलाः । इति ।

आह । तस्मात् । ओषधयः । फलम् । गृह्णन्ति । अयम् । वः ।

गर्भः । ऋत्वियः । प्रत्नम् । सधस्थमिति सध – स्थम् । एति ।

असदत् । इति । आह । याभ्यः । एव । एनम् ।

प्रच्यावयतीति प्र – च्यावयति । तासु । एव । एनम् । प्रतीति ।

स्थापयति । द्वाभ्याम् । उपावहरतीत्युप – अवहरति । प्रतिष्ठित्या इति

प्रति – स्थित्यै ॥ **30 (42)** *(अस्त्व – नुष्टु – बसि – सादयत्या – रूढः–पत्वेति–गर्भ–मसौ – मोददध्वं – द्विचत्वारिंशच्च) (A5)*

**TS 5.1.6.1**

वारुणो वा अग्निरुपनद्धो वि पाजसेति वि स्रꣳसयति सवितृप्रसूत

एवास्य विषूचीं ँवरुणमेनिं ँवि सृजत्यप उप सृजत्यापो वै शान्ताः

शान्ताभिरेवास्य शुचꣳ शमयति तिसृभिरुप सृजति त्रिवृद्वा

अग्निर्यावानेवाग्निस्तस्य शुचꣳ शमयति मित्रः सꣳसृज्य
पृथिवीमित्याह मित्रो वै शिवो देवानां तेनैवै– [ ] 31

**TS 5.1.6.1 - Padam**

वारुणः । वै । अग्निः । उपनद्ध इत्युप – नद्धः । वीति । पाजसा ।
इति । वीति । स्रꣳसयति । सवितृप्रसूत इति सवितृ – प्रसूतः ।
एव । अस्य । विषूचीम् । वरुणमेनिमिति वरुण – मेनिम् । वीति ।
सृजति । अपः । उपेति । सृजति । आपः । वै । शान्ताः ।
शान्ताभिः । एव । अस्य । शुचम् । शमयति । तिसृभिरिति
तिसृ – भिः । उपेति । सृजति । त्रिवृदिति त्रि –वृत् । वै । अग्निः ।
यावान् । एव । अग्निः । तस्य । शुचम् । शमयति । मित्रः ।
सꣳसृज्येति सं – सृज्य । पृथिवीम् । इति । आह । मित्रः । वै ।
शिवः । देवानाम् । तेन । एव । 31 (50)

**TS 5.1.6.2**

–नꣳ सꣳ सृजति शान्त्यै यद् ग्राम्याणां पात्राणां कपालैः
सꣳसृजेद्–ग्राम्याणि पात्राणि शुचा ऽर्पयेदर्मकपालैः सꣳ सृजत्येतानि

वा अनुपजीवनीयानि तान्येव शुचा ऽर्पयति शर्कराभिः स७ँ सृजति धृत्या अथो शंत्वायाजलोमैः स७ँ सृजत्येषा वा अग्नेः प्रिया तनूर्यदजा प्रिययैवैनं तनुवा स७ँ सृजत्यथो तेजसा कृष्णाजिनस्य लोमभिः स७ँ –[ ] **32**

**<u>TS 5.1.6.2 - Padam</u>**

एनम् । समिति । सृजति । शान्त्यै । यत् । ग्राम्याणाम् । पात्राणाम् । कपालैः । स७ँसृजेदिति सं – सृजेत् । ग्राम्याणि । पात्राणि । शुचा । अर्पयेत् । अर्मकपालैरित्यर्म–कपालैः । समिति । सृजति । एतानि । वै । अनुपजीवनीयानीत्यनुप – जीवनीयानि । तानि । एव । शुचा । अर्पयति । शर्कराभिः । समिति । सृजति । धृत्यै । अथो इति । शन्त्वायेति शं – त्वाय । अजलोमैरित्यज–लोमैः । समिति । सृजति । एषा । वै । अग्नेः । प्रिया । तनूः । यत् । अजा । प्रियया । एव । एनम् । तनुवा । समिति । सृजति । अथो इति । तेजसा । कृष्णाजिनस्येति कृष्ण – अजिनस्य । लोमभिरिति लोम – भिः । समिति । **32 (50)**

**TS 5.1.6.3**

सृजति य॒ज्ञो वै कृ॒ष्णाजि॒नं ँय॒ज्ञेनै॒व य॒ज्ञ१ं स१ं सृजति रु॒द्राः सं॒भृत्य॑ पृथि॒वीमित्या॑है॒ता वा ए॒तं दे॒वता॒ अग्रे॒ समभ॒रन् ताभि॒रे॒वैन॒१ं सं भ॑रति म॒खस्य॒ शिरो॒ऽसीत्या॑ह य॒ज्ञो वै म॒खस्तस्यै॒त–च्छिरो॒ यदु॒खा तस्मा॑दे॒वमा॑ह य॒ज्ञस्य॑ प॒दे स्थ॒ इत्या॑ह य॒ज्ञस्य॒ ह्येते – [ ] **33**

**TS 5.1.6.3 - Padam**

सृ॒ज॒ति॒ । य॒ज्ञः । वै । कृ॒ष्णा॒जि॒नमिति॑ कृष्ण – अ॒जि॒नम् । य॒ज्ञेन॑ । ए॒व । य॒ज्ञम् । समिति॑ । सृ॒ज॒ति॒ । रु॒द्राः । सं॒भृत्येति॑ सं – भृत्य॑ । पृ॒थि॒वीम् । इति॑ । आ॒ह॒ । ए॒ताः । वै । ए॒तम् । दे॒वताः॑ । अग्रे॑ । समिति॑ । अ॒भ॒रन्न् । ताभिः॑ । ए॒व । ए॒न॒म् । समिति॑ । भ॒र॒ति॒ । म॒खस्य॑ । शिरः॑ । अ॒सि॒ । इति॑ । आ॒ह॒ । य॒ज्ञः । वै । म॒खः । तस्य॑ । ए॒तत् । शिरः॑ । यत् । उ॒खा । तस्मा॑त् । ए॒वम् । आ॒ह॒ । य॒ज्ञस्य॑ । प॒दे इति॑ । स्थ॒ः । इति॑ । आ॒ह॒ । य॒ज्ञस्य॑ । हि । ए॒ते इति॑ । **33 (50)**

**TS 5.1.6.4**

प॒दे अथो॑ प्रति॑ष्ठित्यै॒ प्रान्याभि॒–र्यच्छ॒त्यन्व॒न्यै–र्मन्त्रयते मिथु॒नत्वा॒य त्र्यु॑द्धिं करोति॒ त्रय॑ इ॒मे लो॒का ए॒षां ँलो॒काना॒माप्त्यै॒ छन्दो॑भिः करोति

वीर्यं ँवै छन्दा॒ꣳसि वी॒र्ये॑णै॒वैनां करोति यजु॑षा॒ बिलं करोति व्यावृत्त्या॒
इयतीं करोति प्र॒जाप॑तिना यज्ञमु॒खेन॒ संमितां द्विस्त॒नां करोति॒
द्यावापृथि॒व्योर्दोहा॒य चतुःस्तनां करोति पश॒ूनां दोहाया॒ष्टास्तनां
करोति॒ छन्दसां॒ दोहा॒य नवाश्रि–मभि॒चरतः ( ) कुर्यात् त्रि॒वृत॒मेव
वज्रꣳ सं॒भृत्य॒ भ्रातृव्याय॒ प्र हरति॒ स्तृत्यै कृ॒त्वाय॒ सा म॒हीमु॒खामिति॒
नि दधाति दे॒वतास्वे॒वैनां॒ प्रति ष्ठापयति ॥ **34**

**TS 5.1.6.4 - Padam**

प॒दे इति । अथो॒ इति । प्रतिष्ठित्या॒ इति॒ प्रति – स्थि॒त्यै॒ । प्रेति ।
अ॒न्याभिः । यच्छति । अन्विति । अ॒न्यैः । म॒न्त्र॒य॒ते॒ । मि॒थु॒न॒त्वायेति
मिथुन – त्वाय । त्र्यु॒द्धिमिति॒ त्रि – उ॒द्धि॒म् । क॒रो॒ति॒ । त्रयः । इ॒मे ।
लो॒काः । ए॒षाम् । लो॒कानाम् । आप्त्यै । छन्दोभि॒रिति॒ छन्दः–भि॒ः ।
क॒रो॒ति॒ । वी॒र्यम् । वै । छन्दाꣳसि । वी॒र्येण । ए॒व । ए॒ना॒म् । क॒रो॒ति॒ ।
यजुषा । बिलम् । क॒रो॒ति॒ । व्यावृत्त्या॒ इति वि – आवृत्त्यै । इयतीम् ।
क॒रो॒ति॒ । प्र॒जाप॒तिनेति प्र॒जा – प॒ति॒ना॒ । य॒ज्ञ॒मु॒खेनेति यज्ञ–मु॒खेन ।
संमि॒तामिति॒ सं – मि॒ता॒म् । द्वि॒स्त॒नामिति द्वि – स्त॒नाम् । क॒रो॒ति॒ ।

द्यावापृथिव्योरिति द्यावा – पृथिव्योः । दोहाय । चतुःस्तनामिति

चतुः – स्तनाम् । करोति । पशूनाम् । दोहाय ।

अष्टास्तनामित्यष्टा – स्तनाम् । करोति । छन्दसाम् । दोहाय ।

नवाश्रिमिति नव – अश्रिम् । अभिचरत इत्यभि – चरतः ( ) ।

कुर्यात् । त्रिवृतमिति त्रि – वृतम् । एव । वज्रम् । संभृत्येति

सं – भृत्य । भ्रातृव्याय । प्रेति । हरति । स्तृत्यै । कृत्वाय ।

सा । महीम् । उखाम् । इति । नीति । दधाति । देवतासु । एव ।

एनाम् । प्रतीति । स्थापयति ॥ **34 (71)**

*(तेनैव – लोमभिः स – मेते – अभिचरत – एकवि॒ँशतिश्च) (A6)*

**TS 5.1.7.1**

सप्तर्भिर्धूपयति सप्त वै शीर्॒.षण्याः प्राणाः शिर एतद्–यज्ञस्य

यदुखा शीर्॒.षन्नेव यज्ञस्य प्राणान् दधाति तस्माथ् सप्त शीर्॒.षन्

प्राणा अश्वशकेन धूपयति प्राजापत्यो वा अश्वः सयोनित्वाया–

दितिस्त्वेत्याहेयं वँा अदितिरदित्यैवादित्यां खनत्यस्या अक्रूरंकाराय

न हि स्वः स्व॒ँ हिनस्ति देवानां त्वा पत्नीरित्याह देवानां– [ ] **35**

**TS 5.1.7.1 - Padam**

सप्तभिरिति सप्त – भिः । धूपयति । सप्त । वै । शीर्.षण्याः ।
प्राणा इति प्र – अनाः । शिरः । एतत् । यज्ञस्य । यत् । उखा ।
शीर्.षन्न् । एव । यज्ञस्य । प्राणानिति प्र – अनान् । दधाति ।
तस्मात् । सप्त । शीर्.षन्न् । प्राणा इति प्र – अनाः ।
अश्वशकेनेत्यश्व–शकेन । धूपयति । प्राजापत्य इति प्राजा–पत्यः ।
वै । अश्वः । सयोनित्वायेति सयोनि–त्वाय । अदितिः । त्वा । इति ।
आह । इयम् । वै । अदितिः । अदित्या । एव । अदित्याम् । खनति ।
अस्याः । अक्रूरंकारायेत्यक्रूरं – काराय । न । हि । स्वः । स्वम् ।
हिनस्ति । देवानाम् । त्वा । पत्नीः । इति । आह ।
देवानाम् । **35 (50)**

**TS 5.1.7.2**

ँवा एतां पत्नयो ऽग्रे ऽकुर्वन् ताभिरेवैनां दधाति धिषणास्त्वेत्याह विद्या
वै धिषणा विद्याभिरेवैनामभीन्धे ग्ना स्त्वेत्याह छन्दा७ंसि वै ग्ना

रछन्दोभिरेवैनाꣳ श्रपयति वरूत्रयस्त्वेत्याह होत्रा वै वरूत्रयो

होत्राभिरेवैनां पचति जनयस्त्वेत्याह देवानां ँवै पत्नी– [ ] **36**

**TS 5.1.7.2 - Padam**

वै । एताम् । पत्नयः । अग्रे । अकुर्वन्न् । ताभिः । एव । एनाम् ।

दधाति । धिषणाः । त्वा । इति । आह । विद्याः । वै । धिषणाः ।

विद्याभिः । एव । एनाम् । अभीति । इन्धे । ग्नाः । त्वा । इति ।

आह । छन्दाꣳसि । वै । ग्नाः । छन्दोभिरिति छन्दः – भिः । एव ।

एनाम् । श्रपयति । वरूत्रयः । त्वा । इति । आह । होत्राः । वै ।

वरूत्रयः । होत्राभिः । एव । एनाम् । पचति । जनयः । त्वा । इति ।

आह । देवानाम् । वै । पत्नीः । **36 (50)**

**TS 5.1.7.3**

–र्जनयस्ताभिरेवैनां पचति षड्भिः पचति षड्वा ऋतव ऋतुभिरेवैनां

पचति द्विः पचन्त्वित्याह तस्माद् द्विः सँवथ्सरस्य सस्यं पच्यते

वारुण्युखाऽभीद्धा मैत्रियोपैति शान्त्यै देवस्त्वा सवितोद्–वपत्वित्याह

सवितृप्रसूत एवैनां ब्रह्मणा देवताभिरुद्–वपत्यपद्यमाना पृथिव्याशा

दिश आ पृणे– [ ] **37**

**<u>TS 5.1.7.3 - Padam</u>**

जनयः । ताभिः । एव । एनाम् । पचति । षड्भिरिति षट् – भिः ।

पचति । षट् । वै । ऋतवः । ऋतुभिरित्यृतु – भिः । एव । एनाम् ।

पचति । द्विः । पचन्तु । इति । आह । तस्मात् । द्विः ।

सँवथ्सरस्येति सं–वथ्सरस्य । सस्यम् । पच्यते । वारुणी । उखा ।

अभीद्धेत्यभि–इद्धा । मैत्रिया । उपेति । एति । शान्त्यै । देवः । त्वा ।

सविता । उदिति । वपतु । इति । आह । सवितृप्रसूत इति

सवितृ – प्रसूतः । एव । एनाम् । ब्रह्मणा । देवताभिः । उदिति ।

वपति । अपद्यमाना । पृथिवि । आशाः । दिशः ।

एति । पृण । **37 (50)**

**<u>TS 5.1.7.4</u>**

–त्याह तस्मादग्निः सर्वा दिशोऽनु वि भात्युत्तिष्ठ बृहती भवोर्द्ध्वा

तिष्ठ ध्रुवा त्वमित्याह प्रतिष्ठित्या असुर्यं पात्रमनाच्छृण्णमा–च्छृणत्ति

देवत्रा–ऽकरजक्षीरेणाऽऽ च्छृणत्ति परमं ँवा एतत् पयो यदजक्षीरं परमेणैवैनां पयसा ऽऽ च्छृणत्ति यजुषा व्यावृत्त्यै छन्दोभिरा च्छृणत्ति छन्दोभिर्वा एषा ( ) क्रियते छन्दोभिरेव छन्दा\ंस्या च्छृणत्ति ॥ **38**

**TS 5.1.7.4 - Padam**

इति । आह । तस्मात् । अग्निः । सर्वाः । दिशः । अनु । वीति । भाति । उदिति । तिष्ठ । बृहती । भव । ऊर्द्ध्वा । तिष्ठ । ध्रुवा । त्वम् । इति । आह । प्रतिष्ठित्या इति प्रति – स्थित्यै । असुर्यम् । पात्रम् । अनाच्छृण्णमित्यना – छृण्णम् । एति । छृणत्ति । देवत्रेति देव–त्रा । अकः । अजक्षीरेणेत्यज – क्षीरेण । एति । छृणत्ति । परमम् । वै । एतत् । पयः । यत् । अजक्षीरमित्यज – क्षीरम् । परमेण । एव । एनाम् । पयसा । एति । छृणत्ति । यजुषा । व्यावृत्त्या इति वि – आवृत्त्यै । छन्दोभिरिति छन्दः – भिः । एति । छृणत्ति । छन्दोभिरिति छन्दः – भिः । वै । एषा ( ) । क्रियते । छन्दोभिरिति छन्दः – भिः । एव । छन्दा\ंसि । एति । छृणत्ति ॥ **38 (56)**

*(आह देवानां – वँै पत्नीः – पृणै – षा – षट् च) (A7)*

**TS 5.1.8.1**

एकवि॒ꣳशत्या माषैः पुरुषशीर्.ष–मच्छैत्यमेद्ध्या वै माषा अमेद्ध्यं पुरुषशीर्.ष–ममेद्ध्यैरेवा–स्या–मेद्ध्यं निरवदाय मेद्ध्यं कृत्वा ऽऽ हरत्येकवि॒ꣳशति–र्भवन्त्येकवि॒ꣳशो वै पुरुषः पुरुषस्याऽऽ*प्त्यै व्यृद्धं ँवा एतत् प्राणैरमेद्ध्यं ँयत् पुरुषशीर्.षꣳ सप्तधा वितृण्णां ँवल्मीकवपां प्रति नि दधाति सप्त वै शीर्.षण्याः प्राणाः प्राणैरेवैनथ्–समर्द्धयति मेद्ध्यत्वाय यावन्तो – [ ] **39**

**TS 5.1.8.1 - Padam**

एकवि॒ꣳशत्येत्येक – वि॒ꣳशत्या । माषैः । पुरुषशीर्.षमिति पुरुष – शीर्.षम् । अच्छ । एति । अमेद्ध्याः । वै । माषाः । अमेद्ध्यम् । पुरुषशीर्.षमिति पुरुष – शीर्.षम् । अमेद्ध्यैः । एव । अस्य । अमेद्ध्यम् । निरवदायेति निः – अवदाय । मेद्ध्यम् । कृत्वा । एति । हरति । एकवि॒ꣳशतिरित्येक – वि॒ꣳशतिः । भवन्ति । एकवि॒ꣳश इत्येक – वि॒ꣳशः । वै । पुरुषः । पुरुषस्य । आप्त्यै । व्यृद्धमिति वि – ऋद्धम् । वै । एतत् । प्राणैरिति प्र – अनैः ।

अमेद्ध्यम् । यत् । पुरुषशीर्.षमिति पुरुष – शीर्.षम् । सप्तधेति सप्त – धा । वितृण्णामिति वि – तृण्णाम् । वल्मीकवपामिति वल्मीक–वपाम् । प्रति । नीति । दधाति । सप्त । वै । शीर्.षण्याः । प्राणा इति प्र – अनाः । प्राणैरिति प्र – अनैः । एव । एनत् । समिति । अर्द्धयति । मेद्ध्यत्वायेति मेद्ध्य – त्वाय । यावन्तः । **39 (50)**

**<u>TS 5.1.8.2</u>**

वै मृत्युबन्धवस्तेषां ँयम आधिपत्यं परीयाय यमगाथाभिः परि गायति यमादेवैनद्–वृङ्क्ते तिसृभिः परि गायति त्रय इमे लोका एभ्य एवैनल्लोकेभ्यो वृङ्क्ते तस्माद्–गायते न देयं गाथा हि तद्–वृङ्क्ते ऽग्निभ्यः पशूना लभते कामा वा अग्नयः कामानेवाव रुन्धे यत् पशून् नाऽऽ*लभेताऽनवरुद्धा अस्य – [ ] **40**

**<u>TS 5.1.8.2 - Padam</u>**

वै । मृत्युबन्धव इति मृत्यु – बन्धवः । तेषाम् । यमः । आधिपत्यमित्याधि – पत्यम् । परीति । इयाय ।

यमगाथाभिरिति यम - गाथाभिः । परीति । गायति । यमात् । एव ।
एनत् । वृङ्क्ते । तिसृभिरिति तिसृ - भिः । परीति । गायति । त्रयः ।
इमे । लोकाः । एभ्यः । एव । एनत् । लोकेभ्यः । वृङ्क्ते । तस्मात् ।
गायते । न । देयम् । गाथा । हि । तत् । वृङ्क्ते । अग्निभ्य
इत्यग्नि-भ्यः । पशून् । एति । लभते । कामाः । वै । अग्नयः ।
कामान् । एव । अवेति । रुन्धे । यत् । पशून् । न ।
आलभेतेत्या - लभेत । अनवरुद्धा इत्यनव - रुद्धाः ।
अस्य । **40 (50)**

**<u>TS 5.1.8.3</u>**

पशवः स्युर्यत् पर्यग्निकृतानुथ्सृजेद्-यज्ञवेशसं कुर्याद्-यथ्
स७स्थापयेद्-यातयामानि शीर्.षाणि स्युर्यत् पशूनालभते तेनैव
पशूनव रुन्धे यत् पर्यग्निकृतानुथ्सृजति शीर्ष्णा-मयातयामत्वाय
प्राजापत्येन स७ स्थापयति यज्ञो वै प्रजापतिर्यज्ञ एव यज्ञं
प्रति ष्ठापयति प्रजापतिः प्रजा असृजत स रिरिचानोऽमन्यत स एता
आप्रीरपश्यत् ताभिर्वै स मुखत- [ ] **41**

**TS 5.1.8.3 - Padam**

पशवः । स्युः । यत् । पर्यग्निकृतानिति पर्यग्नि – कृतान् ।

उथ्सृजेदित्युत् – सृजेत् । यज्ञवेशसमिति यज्ञ–वेशसम् । कुर्यात् ।

यत् । स॒ᳵस्थापयेदिति सं – स्थापयेत् ।

यातयामानीति यात – यामानि । शीर्.षाणि । स्युः । यत् । पशून् ।

आलभत इत्या – लभते । तेन । एव । पशून् । अवेति । रुन्धे ।

यत् । पर्यग्निकृतानिति पर्यग्नि – कृतान् । उथ्सृजतीत्युत्–सृजति ।

शीर्ष्णाम् । अयातयामत्वायेत्ययातयाम – त्वाय । प्राजापत्येनेति

प्राजा – पत्येन । समिति । स्थापयति । यज्ञः । वै । प्रजापतिरिति

प्रजा – पतिः । यज्ञे । एव । यज्ञम् । प्रतीति । स्थापयति ।

प्रजापतिरिति प्रजा – पतिः । प्रजा इति प्र – जाः । असृजत ।

सः । रिरिचानः । अमन्यत । सः । एताः । आप्रीरित्या – प्रीः ।

अपश्यत् । ताभिः । वै । सः । मुखतः । **41 (50)**

**TS 5.1.8.4**

आत्मानमा ऽप्रीणीत यदेता आप्रियो भवन्ति यज्ञो वै प्रजापति–

र्यज्ञमेवैताभिर्मुखत आ प्रीणात्यपरिमितछन्दसो भवन्त्यपरिमितः

प्रजापतिः प्रजापतेराप्त्या ऊनातिरिक्ता मिथुनाः प्रजात्यै लोमशं वै

नामैतच्छन्दः प्रजापतेः पशवो लोमशाः पशूनेवाऽव रुन्धे सर्वाणि

वा एता रूपाणि सर्वाणि रूपाण्यग्नौ चित्ये क्रियन्ते तस्मादेता

अग्नेश्चित्यस्य – [ ] **42**

**TS 5.1.8.4 - Padam**

आत्मानम् । एति । अप्रीणीत । यत् । एताः । आप्रिय इत्या–प्रियः ।

भवन्ति । यज्ञः । वै । प्रजापतिरिति प्रजा – पतिः । यज्ञम् । एव ।

एताभिः । मुखतः । एति । प्रीणाति । अपरिमितछन्दस

इत्यपरिमित – छन्दसः । भवन्ति । अपरिमित इत्यपरि – मितः ।

प्रजापतिरिति प्रजा – पतिः । प्रजापतेरिति प्रजा – पतेः । आप्त्यै ।

ऊनातिरिक्ता इत्यून – अतिरिक्ताः । मिथुनाः । प्रजात्या इति

प्र – जात्यै । लोमशम् । वै । नाम । एतत् । छन्दः ।

प्रजापतेरिति प्रजा – पतेः । पशवः । लोमशाः । पशून् । एव ।
अवेति । रुन्धे । सर्वाणि । वै । एताः । रूपाणि । सर्वाणि ।
रूपाणि । अग्नौ । चित्ये । क्रियन्ते । तस्मात् । एताः । अग्नेः ।
चित्यस्य । **42 (50)**

**TS 5.1.8.5**

भवन्त्येकवि॒ꣳशति॒ꣳ सामिधेनीरन्वाह रुग्वा एकवि॒ꣳशो रुचमेव गच्छत्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकवि॒ꣳश–श्चतुर्वि॒ꣳशतिमन्वाह चतुर्वि॒ꣳशतिरर्द्धमासाः सँवथ्सरः सँवथ्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुन्धे पराचीरन्वाह पराङिव हि सुवर्गो लोकः समास्त्वाऽग्न ऋतवो वर्द्धयन्त्वित्याह समाभिरेवाऽग्निं
वँर्द्धय–[ ] **43**

**TS 5.1.8.5 - Padam**

भवन्ति । एकवि॒ꣳशतिमित्येक – वि॒ꣳशतिम् । सामिधेनीरिति
सां – इधेनीः । अन्विति । आह । रुक् । वै । एकवि॒ꣳश
इत्येक – वि॒ꣳशः । रुचम् । एव । गच्छति । अथो इति ।

प्रतिष्ठामिति प्रति – स्थाम् । एव । प्रतिष्ठेति प्रति – स्था । हि ।

एकवि॒ꣳश इत्येक – वि॒ꣳशः । चतुर्वि॒ꣳशतिमिति

चतुः – वि॒ꣳशतिम् । अन्विति । आह । चतुर्वि॒ꣳशतिरिति

चतुः – वि॒ꣳशतिः । अर्द्धमासा इत्यर्द्ध – मासाः । सँवथ्सर इति

सं – वथ्सरः । सँवथ्सर इति सं – वथ्सरः । अग्निः ।

वैश्वानरः । साक्षादिति स – अक्षात् । एव । वैश्वानरम् । अवेति ।

रुन्धे । पराचीः । अन्विति । आह । पराङ् । इव । हि । सुवर्ग इति

सुवः – गः । लोकः । समाः । त्वा । अग्ने । ऋतवः । वर्द्धयन्तु ।

इति । आह । समाभिः । एव । अग्निम् । वर्द्धयति । **43 (50)**

**<u>TS 5.1.8.6</u>**

त्वृतुभिः सँवथ्सरं ँविश्वा आ भाहि प्रदिशः पृथिव्या इत्याह

तस्मादग्निः सर्वा दिशोऽनु वि भाति प्रत्यौहतामश्विना

मृत्युमस्मादित्याह मृत्युमेवाऽस्मादप नुदत्युद्वयं तमसस्परीत्याह पाप्मा

वै तमः पाप्मानमेवास्मादप हन्त्यगन्म ज्योतिरुत्तम–मित्याहाऽसौ वा

आदित्यो ( ) ज्योतिरुत्तम–मादित्यस्यैव सायुज्यं गच्छति न

सँवथ्सरस्तिष्ठति नास्य श्रीस्तिष्ठति यस्यैताः क्रियन्ते ज्योतिष्मती–
मुत्तमामन्वाह ज्योतिरेवास्मा उपरिष्टाद् दधाति सुवर्गस्य
लोकस्यानुख्यात्यै ॥ 44

**TS 5.1.8.6 - Padam**

ऋतुभिरित्यृतु – भिः । सँवथ्सरमिति सं – वथ्सरम् । विश्वाः ।
एति । भाहि । प्रदिश इति प्र – दिशः । पृथिव्याः । इति । आह ।
तस्मात् । अग्निः । सर्वाः । दिशः । अनु । वीति । भाति । प्रतीति ।
औहताम् । अश्विना । मृत्युम् । अस्मात् । इति । आह । मृत्युम् ।
एव । अस्मात् । अपेति । नुदति । उदिति । वयम् । तमसः । परीति ।
इति । आह । पाप्मा । वै । तमः । पाप्मानम् । एव । अस्मात् ।
अपेति । हन्ति । अगन्म । ज्योतिः । उत्तममित्युत् – तमम् । इति ।
आह । असौ । वै । आदित्यः ( ) । ज्योतिः । उत्तममित्युत्–तमम् ।
आदित्यस्य । एव । सायुज्यम् । गच्छति । न । सँवथ्सर
इति सं – वथ्सरः । तिष्ठति । न । अस्य । श्रीः । तिष्ठति । यस्य ।
एताः । क्रियन्ते । ज्योतिष्मतीम् । उत्तमामित्युत् – तमाम् । अन्विति ।

आह । ज्योतिः । एव । अस्मै । उपरिष्टात् । दधाति । सुवर्गस्येति

सुवः – गस्य । लोकस्य । अनुख्यात्या इत्यनु – ख्यात्यै ॥ **44 (78)**

*(यावन्तो – ऽस्य – मुखत – श्चित्यस्य – वर्द्धय – त्यादित्यो –*

*ऽष्टावि॑ँशतिश्च) (A8)*

**TS 5.1.9.1**

षड्भिर्दीक्षयति षड् वा ऋतव ऋतुभिरेवैनं दीक्षयति सप्तभिर्दीक्षयति

सप्त छन्दा॑ँसि छन्दोभिरेवैनं दीक्षयति विश्वे देवस्य नेतुरित्य–

नुष्टुभोत्तमया जुहोति वाग्वा अनुष्टुप् तस्मात् प्राणानां ँवागुत्तमै–

कस्मादक्षरादनाप्तं प्रथमं पदं तस्माद्–यद्–वाचोऽनाप्तं तन्मनुष्या

उप जीवन्ति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः – [ ] **45**

**TS 5.1.9.1 - Padam**

षड्भिरिति षट् – भिः । दीक्षयति । षट् । वै । ऋतवः ।

ऋतुभिरित्यृतु–भिः । एव । एनम् । दीक्षयति । सप्तभिरिति

सप्त – भिः । दीक्षयति । सप्त । छन्दा॑ँसि । छन्दोभिरिति

छन्दः – भिः । एव । एनम् । दीक्षयति । विश्वे । देवस्य । नेतुः ।

इति । अनुष्टुभेत्यनु – स्तुभा । उत्तमयेत्युत् – तमया । जुहोति ।
वाक् । वै । अनुष्टुबित्यनु – स्तुप् । तस्मात् । प्राणानामिति
प्र – अनानाम् । वाक् । उत्तमेत्युत् – तमा । एकस्मात् । अक्षरात् ।
अनाप्तम् । प्रथमम् । पदम् । तस्मात् । यत् । वाचः । अनाप्तम् ।
तत् । मनुष्याः । उपेति । जीवन्ति । पूर्णया । जुहोति । पूर्णः । इव ।
हि । प्रजापतिरिति प्रजा – पतिः । **45 (50)**

**<u>TS 5.1.9.2</u>**

प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत
प्रजानाᳪं सृष्ट्यै यदर्चिषि प्रवृञ्ज्याद्–भूतमव रुन्धीत यदङ्गारेषु
भविष्यदङ्गारेषु प्र वृणक्ति भविष्यदेवाव रुन्धे भविष्यद्धि भूयो
भूताद्–द्वाभ्यां प्र वृणक्ति द्विपाद्–यजमानः प्रतिष्ठित्यै ब्रह्मणा वा एषा
यजुषा संभृता यदुखा सा यद्विद्येताऽऽ*र्तिमार्च्छे– [ ] **46**

**<u>TS 5.1.9.2 - Padam</u>**

प्रजापतेरिति प्रजा – पतेः । आप्त्यै । न्यूनयेति नि – ऊनया ।
जुहोति । न्यूनादिति नि – ऊनात् । हि । प्रजापतिरिति प्रजा–पतिः ।

प्रजा इति प्र – जाः । असृजत । प्रजानामिति प्र – जानाम् ।

सृष्ट्यै । यत् । अर्चिषि । प्रवृञ्ज्यादिति प्र – वृञ्ज्यात् । भूतम् ।

अवेति । रुन्धीत । यत् । अङ्गारेषु । भविष्यत् । अङ्गारेषु । प्रेति ।

वृणक्ति । भविष्यत् । एव । अवेति । रुन्धे । भविष्यत् । हि । भूयः ।

भूतात् । द्वाभ्याम् । प्रेति । वृणक्ति । द्विपादिति द्वि–पात् । यजमानः ।

प्रतिष्ठित्या इति प्रति – स्थित्यै । ब्रह्मणा । वै । एषा । यजुषा ।

संभृतेति सं – भृता । यत् । उखा । सा । यत् । भिद्येत । आर्तिम् ।

एति । ऋच्छेत् । **46 (50)**

**TS 5.1.9.3**

–द्यजमानो हन्येताऽस्य यज्ञो मित्रैतामुखां तपेत्याह ब्रह्म वै मित्रो

ब्रह्मन्नेवैनां प्रति ष्ठापयति नाऽऽर्तिमार्च्छति यजमानो नास्य यज्ञो

हन्यते यदि भिद्येत तैरेव कपालैः स७ं सृजेथ् सैव ततः

प्रायश्चित्तिर्यो गतश्रीः स्यान्मथित्वा तस्याव दद्ध्याद्–भूतो

वा एष स स्वां– [ ] **47**

**TS 5.1.9.3 - Padam**

यजमानः । हन्येत । अस्य । यज्ञः । मित्र । एताम् । उखाम् । तप । इति । आह । ब्रह्म । वै । मित्रः । ब्रह्मन्न् । एव । एनाम् । प्रतीति । स्थापयति । न । आर्तिम् । एति । ऋच्छति । यजमानः । न । अस्य । यज्ञः । हन्यते । यदि । भिद्येत । तैः । एव । कपालैः । समिति । सृजेत् । सा । एव । ततः । प्रायश्चित्तिः । यः । गतश्रीरिति गत – श्रीः । स्यात् । मथित्वा । तस्य । अवेति । दद्ध्यात् । भूतः । वै । एषः । सः । स्वाम् । **47 (50)**

**TS 5.1.9.4**

देवतामुपैति यो भूतिकामः स्याद्य उखायै संभवेथ् स एव तस्य स्यादतो ह्येष संभवत्येष वै स्वयंभूर्नाम भवत्येव यं कामयेत भ्रातृव्यमस्मै जनयेय–मित्यन्यतस्तस्या–ऽऽहृत्याव दद्ध्याथ् साक्षादेवास्मै भ्रातृव्यं जनयत्यम्बरीषा–दन्नकामस्याव दद्ध्यादंबरीषे वा अन्नं भ्रियते सयोन्येवान्न– [ ] **48**

**TS 5.1.9.4 - Padam**

देवताम् । उपेति । एति । यः । भूतिकाम इति भूति – कामः ।

स्यात् । यः । उखायै । संभवेदिति सं – भवेत् । सः । एव ।

तस्य । स्यात् । अतः । हि । एषः । संभवतीति सं–भवति । एषः ।

वै । स्वयंभूरिति स्वयं–भूः । नाम । भवति । एव । यम् । कामयेत ।

भ्रातृव्यम् । अस्मै । जनयेयम् । इति । अन्यतः । तस्य ।

आहृत्येत्या – हृत्य । अवेति । दद्ध्यात् । साक्षादिति स – अक्षात् ।

एव । अस्मै । भ्रातृव्यम् । जनयति । अंबरीषात् ।

अन्नकामस्येत्यन्न – कामस्य । अवेति । दद्ध्यात् । अंबरीषे । वै ।

अन्नम् । भ्रियते । सयोनीति स – योनि । एव । अन्नम् । **48 (50)**

**TS 5.1.9.5**

–मव रुन्धे मुञ्जानव दधात्यूर्ग्वै मुञ्जा ऊर्जमेवास्मा अपि

दधात्यग्निर्देवेभ्यो निलायत स क्रुमुकं प्राऽ*विशत् क्रुमुकमव दधाति

यदेवास्य तत्र न्यक्तं तदेवाव रुन्ध आज्येन सं ँयौत्येतद्वा अग्नेः प्रियं

धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्द्धयत्यथो तेजसा – [ ] **49**

**TS 5.1.9.5 - Padam**

अवेति । रुन्धे । मुञ्जान् । अवेति । दधाति । ऊर्क् । वै । मुञ्जाः ।
ऊर्जम् । एव । अस्मै । अपीति । दधाति । अग्निः । देवेभ्यः ।
निलायत । सः । क्रुमुकम् । प्रेति । अविशत् । क्रुमुकम् । अवेति ।
दधाति । यत् । एव । अस्य । तत्र । न्यक्तमिति नि – अक्तम् । तत् ।
एव । अवेति । रुन्धे । आज्येन । समिति । यौति । एतत् । वै ।
अग्नेः । प्रियम् । धाम । यत् । आज्यम् । प्रियेण । एव । एनम् ।
धाम्ना । समिति । अर्द्धयति । अथो इति । तेजसा । **49 (50)**

**TS 5.1.9.6**

वैकंकतीमा दधाति भा एवाव रुन्धे शमीमयीमा दधाति शान्त्यै
सीद त्वं मातुरस्या उपस्थ इति तिसृभिर्जातमुप तिष्ठते त्रय इमे
लोका एष्वेव लोकेष्वाविदं गच्छत्यथो प्राणानेवाऽऽत्मन् धत्ते ॥ **50**

**TS 5.1.9.6 - Padam**

वैकङ्कतीम् । एति । दधाति । भाः । एव । अवेति । रुन्धे ।
शमीमयीमिति शमी – मयीम् । एति । दधाति । शान्त्यै ।
सीद । त्वम् । मातुः । अस्याः । उपस्थ इत्युप – स्थे । इति ।

तिसृभिरिति तिसृ - भिः । जातम् । उपेति । तिष्ठते । त्रयः । इमे । लोकाः । एषु । एव । लोकेषु । आविदमित्या - विदम् । गच्छति । अथो इति । प्राणानिति प्र - अनान् । एव । आत्मन्न् । धत्ते ॥ **50 (34)** *(प्रजापतिर् - ऋच्छेथ् - स्वा - मेवान्नं - तेजसा - चतुस्त्रिꣳशच्च) (A9)*

**TS 5.1.10.1**

न ह स्म वै पुराऽग्निरपरशुवृक्णं दहति तदस्मै प्रयोग एवर्.षिरस्वदयद्-यदग्ने यानि कानि चेति समिधमा दधात्यपरशुवृक्ण-मेवास्मै स्वदयति सर्वमस्मै स्वदते य एवं वेदौदुम्बरीमा दधात्यूर्ग्वा उदुम्बर ऊर्जमेवास्मा अपि दधाति प्रजापतिरग्नि-मसृजत तꣳ सृष्टꣳ रक्षाꣳस्य- [ ] **51**

**TS 5.1.10.1 - Padam**

न । ह । स्म । वै । पुरा । अग्निः । अपरशुवृक्णमित्यपरशु-वृक्णम् । दहति । तत् । अस्मै । प्रयोग इति प्र - योगः । एव । ऋषिः । अस्वदयत् । यत् । अग्ने । यानि । कानि । च । इति ।

समिधमिति सं – इधम् । एति । दधाति ।

अपरशुवृक्णमित्यपरशु–वृक्णम् । एव । अस्मै । स्वदयति । सर्वम् ।

अस्मै । स्वदते । यः । एवम् । वेद । औदुंबरीम् । एति । दधाति ।

ऊर्क् । वै । उदुंबरः । ऊर्जम् । एव । अस्मै । अपीति । दधाति ।

प्रजापतिरिति प्रजा – पतिः । अग्निम् । असृजत । तम् ।

सृष्टम् । रक्षा॑ꣳसि । **51 (50)**

**<u>TS 5.1.10.2</u>**

–जिघाꣳसन्थ्स एतद्–राक्षोघ्नमपश्यत् तेन वै स रक्षाꣴस्यपाहत

यद्–राक्षोघ्नं भवत्यग्नेरेव तेन जाताद्–रक्षाꣴस्यप हन्त्याश्वत्थीमा

दधात्यश्वत्थो वै वनस्पतीनाꣳ सपत्नसाहो विजित्यै वैकङ्कतीमा

दधाति भा एवाव रुन्धे शमीमयीमा दधाति शान्त्यै सꣳशितं मे

ब्रह्मोदेषां बाहू अतिरमित्युत्तमे औदुम्बरी – [ ] **52**

**<u>TS 5.1.10.2 - Padam</u>**

अजिघाꣳसन्न् । सः । एतत् । राक्षोघ्नमिति राक्षः–घ्नम् । अपश्यत् ।

तेन । वै । सः । रक्षाꣳसि । अपेति । अहत । यत् ।

राक्षोघ्नमिति राक्षः – घ्नम् । भवति । अग्नेः । एव । तेन । जातात् । रक्षाꣳसि । अपेति । हन्ति । आश्वत्थीम् । एति । दधाति । अश्वत्थः । वै । वनस्पतीनाम् । सपत्नसाह इति सपत्न – साहः । विजित्या इति वि – जित्यै । वैकङ्कतीम् । एति । दधाति । भाः । एव । अवेति । रुन्धे । शमीमयीमिति शमी – मयीम् । एति । दधाति । शान्त्यै । सꣳशितमिति सं–शितम् । मे । ब्रह्म । उदिति । एषाम् । बाहू इति । अतिरम् । इति । उत्तमे इत्युत् – तमे । औदुंबरी इति । **52 (50)**

**TS 5.1.10.3**

वाचयति ब्रह्मणैव क्षत्रꣳ सꣳ श्यति क्षत्रेण ब्रह्म तस्माद् ब्राह्मणो राजन्यवानत्यन्यं ब्राह्मणं तस्माद्–राजन्यो ब्राह्मणवानत्यन्यꣳ राजन्यं मृत्युर्वा एष यदग्निरमृतꣳ हिरण्यꣳ रुक्ममन्तरं प्रति मुञ्चते ऽमृतमेव मृत्योरन्तर्धत्त एकविꣳशतिनिर्बाधो भवत्येकविꣳशतिर्वै देवलोका द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य– [ ] 53

**TS 5.1.10.3 - Padam**

वाचयति । ब्रह्मणा । एव । क्षत्रम् । समिति । श्यति । क्षत्रेण । ब्रह्म ।

तस्मात् । ब्राह्मणः । राजन्यवानिति राजन्य – वान् । अतीति ।

अन्यम् । ब्राह्मणम् । तस्मात् । राजन्यः । ब्राह्मणवानिति

ब्राह्मण – वान् । अतीति । अन्यम् । राजन्यम् । मृत्युः । वै । एषः ।

यत् । अग्निः । अमृतम् । हिरण्यम् । रुक्मम् । अन्तरम् । प्रतीति ।

मुञ्चते । अमृतम् । एव । मृत्योः । अन्तः । धत्ते ।

एकवि॒ꣳशतिनिर्बाध इत्येकवि॒ꣳशति – निर्बाधः । भवति ।

एकवि॒ꣳशतिरित्येक–वि॒ꣳशतिः । वै । देवलोका इति देव–लोकाः ।

द्वादश । मासाः । पञ्च । ऋतवः । त्रयः । इमे । लोकाः । असौ ।

आदित्यः । **53 (50)**

**TS 5.1.10.4**

एकवि॒ꣳश एतावन्तो वै देवलोकास्तेभ्य एव भ्रातृव्यमन्तरेति

निर्बाधैर्वै देवा असुरान् निर्बाधे ऽकुर्वत तन्निर्बाधानां निर्बाधत्वं

निर्बाधी भवति भ्रातृव्यानेव निर्बाधे कुरुते सावित्रिया प्रति मुञ्चते

प्रसूत्यै नक्तोषासेत्युत्तरया ऽहोरात्राभ्यामेवैन–मुद्यच्छते देवा अग्निं धारयन् द्रविणोदा इत्याह प्राणा वै देवा द्रविणोदा अहोरात्राभ्यामेवैनमुद्यत्य – [ ] **54**

**TS 5.1.10.4 - Padam**

एकविꣳश इत्येक – विꣳशः । एतावन्तः । वै । देवलोका इति देव – लोकाः । तेभ्यः । एव । भ्रातृव्यम् । अन्तः । एति । निर्बाधैरिति निः – बाधैः । वै । देवाः । असुरान् । निर्बाध इति निः – बाधे । अकुर्वत । तत् । निर्बाधानामिति निः – बाधानाम् । निर्बाधत्वमिति निर्बाध – त्वम् । निर्बाधीति निः – बाधी । भवति । भ्रातृव्यान् । एव । निर्बाध इति निः – बाधे । कुरुते । सावित्रिया । प्रतीति । मुञ्चते । प्रसूत्या इति प्र – सूत्यै । नक्तोषासा । इति । उत्तरयेत्युत् – तरया । अहोरात्राभ्यामित्यहः – रात्राभ्याम् । एव । एनम् । उदिति । यच्छते । देवाः । अग्निम् । धारयन्न् । द्रविणोदा इति द्रविणः – दाः । इति । आह । प्राणा इति प्र – अनाः । वै ।

देवाः । द्रविणोदा इति द्रविणः – दाः ।
अहोरात्राभ्यामित्यहः – रात्राभ्याम् । एव । एनम् ।
उद्यत्येत्युत्–यत्य । **54 (50)**

**TS 5.1.10.5**

प्राणैर्दाधारा ऽऽसीनः प्रति मुञ्चते तस्मादासीनाः प्रजाः प्र जायन्ते कृष्णाजिनमुत्तरं तेजो वै हिरण्यं ब्रह्म कृष्णाजिनं तेजसा चैवैनं ब्रह्मणा चोभयतः परि गृह्णाति षडुद्यामꣳ शिक्यं भवति षड्वा ऋतव ऋतुभिरेवैन–मुद्यच्छते यद् द्वादशोद्यामꣳ सँवथ्सरेणैव मौञ्जं भवत्यूर्ग्वै मुञ्जा ऊर्जैवैनꣳ स ( ) मर्द्धयति सुपर्णोऽसि गरुत्मानित्यवेक्षते रूपमेवास्यैतन्महिमानं ँव्याचष्टे दिवं गच्छ सुवः पतेत्याह सुवर्गमेवैनं ँलोकं गमयति ॥ **55**

**TS 5.1.10.5 - Padam**

प्राणैरिति प्र – अनैः । दाधार । आसीनः । प्रतीति । मुञ्चते ।
तस्मात् । आसीनाः । प्रजा इति प्र – जाः । प्रेति । जायन्ते ।
कृष्णाजिनमिति कृष्ण – अजिनम् । उत्तरमित्युत् – तरम् । तेजः ।

वै । हिरण्यम् । ब्रह्म । कृष्णाजिनमिति कृष्ण – अजिनम् । तेजसा ।

च । एव । एनम् । ब्रह्मणा । च । उभयतः । परीति । गृह्णाति ।

षडुद्याममिति षट् – उद्यामम् । शिक्यम् । भवति । षट् । वै ।

ऋतवः । ऋतुभिरित्यृतु – भिः । एव । एनम् । उदिति । यच्छते ।

यत् । द्वादशोद्याममिति द्वादश – उद्यामम् । सँवथ्सरेणेति

सं – वथ्सरेण । एव । मौञ्जम् । भवति । ऊर्क् । वै । मुञ्जाः ।

ऊर्जा । एव । एनम् । समिति ( ) । अर्द्धयति । सुपर्ण इति

सु – पर्णः । असि । गरुत्मान् । इति । अवेति । ईक्षते । रूपम् ।

एव । अस्य । एतत् । महिमानम् । व्याचष्ट इति वि – आचष्टे ।

दिवम् । गच्छ । सुवः । पत । इति । आह । सुवर्गमिति

सुवः – गम् । एव । एनम् । लोकम् । गमयति ॥ **55 (74)**

*(रक्षा॒ऽस्यौ – दुंबरी – आदित्य – उद्यत्य – सं – चतुर्विं॒ऽशतिश्च) (A10)*

**TS 5.1.11.1**

समिद्धो अ॒ञ्जन् कृद॑रं मती॒नां घृ॒तम॑ग्ने॒ मधु॑म॒त् पिन्व॑मानः ।
वा॒जी वह॑न् वा॒जिनं॑ जातवेदो दे॒वानां᳚ँ वक्षि प्रि॒यमा स॒धस्थं᳚ ॥
घृ॒ते॒नाञ्जन्थ्सं प॒थो दे॒व॑यानान् प्रजा॒नन् वा॒ज्यप्ये॑तु दे॒वान् ।
अनु॑ त्वा सप्ते प्र॒दि॑शः सचन्ता७ स्व॒धाम॒स्मै यजमानाय धेहि ॥
ईड्य॒श्चासि॒ वन्द्य॑श्च वाजिन्ना॒शुश्चासि॒ मेद्ध्य॑श्च सप्ते ।
अ॒ग्निष्ट्वा॑–[ ] **56**

**TS 5.1.11.1 - Padam**

समि॑द्ध॒ इति॒ सं – इ॒द्धः॒ । अ॒ञ्जन्न् । कृद॑रम् । म॒ती॒नाम् । घृ॒तम् ।
अ॒ग्ने॒ । मधु॑म॒दिति॒ मधु॑ – म॒त् । पिन्व॑मानः ॥ वा॒जी । वह॒न्न् ।
वा॒जिन॒म् । जा॒त॒वे॒द॒ इति॑ जात – वे॒दः॒ । दे॒वाना॒म् । व॒क्षि॒ । प्रि॒यम् ।
एति॑ । स॒धस्थ॒मिति॑ स॒ध – स्थ॒म् ॥ घृ॒तेन॑ । अ॒ञ्जन्न् । समिति॑ ।
प॒थः । दे॒व॒याना॒निति॑ देव – याना॑न् । प्र॒जा॒नन्निति॑ प्र – जा॒नन्न् ।
वा॒जी । अपीति॑ । ए॒तु॒ । दे॒वान् ॥ अन्विति॑ । त्वा॒ । स॒प्ते॒ । प्र॒दि॒श॒
इति॑ प्र – दि॒शः॑ । स॒च॒न्ता॒म् । स्व॒धामिति॑ स्व – धाम् । अ॒स्मै ।

यजमानाय । धेहि ॥ ईड्यः । च । असि । वन्द्यः । च । वाजिन्न् ।

आशुः । च । असि । मेद्ध्यः । च । सप्ते ॥

अग्निः । त्वा । **56 (50)**

**TS 5.1.11.2**

देवैर्वसुभिः सजोषाः प्रीतं ँवह्निं ँवहतु जातवेदाः ॥

स्तीर्णम् बर्.हिः **सुष्टरीमा** जुषाणोरु पृथु प्रथमानं पृथिव्यां ।

देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥

एता उ वः सुभगा विश्वरूपा वि पक्षोभिः श्रयमाणा उदातैः ।

ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥

अन्तरा मित्रावरुणा चरन्ती मुखं ँयज्ञानामभि सँविदाने ।

उषासा वा॒ – [ ] **57**

**TS 5.1.11.2 - Padam**

देवैः । वसुभिरिति वसु – भिः । सजोषा इति स – जोषाः ।

प्रीतम् । वह्निम् । वहतु । जातवेदा इति जात – वेदाः ॥ स्तीर्णम् ।

बर्.हिः । सुष्टरीमेति सु – स्तरीम । जुषाणा । उरु । पृथु ।

प्रथमानम् । पृथिव्याम् ॥ देवेभिः । युक्तम् । अदितिः ।
सजोषा इति स – जोषाः । स्योनम् । कृण्वाना । सुविते । दधातु ॥
एताः । उ । वः । सुभगा इति सु – भगाः । विश्वरूपा इति
विश्व – रूपाः । वीति । पक्षोभिरिति पक्षः – भिः । श्रयमाणाः ।
उदिति । आतैः ॥ ऋष्वाः । सतीः । कवषः । शुंभमानाः । द्वारः ।
देवीः । सुप्रायणा इति सु – प्रायणाः । भवन्तु ॥ अन्तरा ।
मित्रावरुणेति मित्रा – वरुणा । चरन्ती इति । मुखम् । यज्ञानाम् ।
अभीति । सँविदाने इति सं – विदाने ॥ उषासा । वाम् । **57 (50)**

**<u>TS 5.1.11.3</u>**

सुहिरण्ये सुशिल्पे ऋतस्य योनाविह सादयामि ॥
प्रथमा वा॑ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥
आदित्यैर्नो भारती वष्टु यज्ञ॑ सरस्वती सह रुद्रैर्न आवीत् ।
इडोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त ॥
त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः ( ) । **58**

**TS 5.1.11.3 - Padam**

सुहिरण्ये इति सु – हिरण्ये । सुशिल्पे इति सु–शिल्पे । ऋतस्य ।
योनौ । इह । सादयामि ॥ प्रथमा । वाम् । सरथिनेति स – रथिना ।
सुवर्णेति सु – वर्णा । देवौ । पश्यन्तौ । भुवनानि । विश्वा ॥
अपिप्रयम् । चोदना । वाम् । मिमाना । होतारा । ज्योतिः । प्रदिशेति
प्र – दिशा । दिशन्ता ॥ आदित्यैः । नः । भारती । वष्टु । यज्ञम् ।
सरस्वती । सह । रुद्रैः । नः । आवीत् ॥ इडा । उपहूतेत्युप–हूता ।
वसुभिरिति वसु – भिः । सजोषा इति स – जोषाः । यज्ञम् । नः ।
देवीः । अमृतेषु । धत्त ॥ त्वष्टा । वीरम् । देवकाममिति देव–कामम् ।
जजान । त्वष्टुः । अर्वा । जायते । आशुः । अश्वः ॥ **58 (50)**

**TS 5.1.11.4**

त्वष्टेदं ँविश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः ॥
अश्वो घृतेन त्मन्या समक्त उप देवा९ ऋतुशः पाथ एतु ।
वनस्पति–र्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥

प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साद्ध्या हविरदन्तु देवाः ॥ **59**

**TS 5.1.11.4 - Padam**

त्वष्टा । इदम् । विश्वम् । भुवनम् । जजान । बहोः । कर्तारम् । इह । यक्षि । होतः ॥ अश्वः । घृतेन । त्मन्या । समक्त इति सं – अक्तः । उपेति । देवान् । ऋतुश इत्यृतु – शः । पाथः । एतु ॥ वनस्पतिः । देवलोकमिति देव – लोकम् । प्रजानन्निति प्र–जानन्न् । अग्निना । हव्या । स्वदितानि । वक्षत् ॥ प्रजापतेरिति प्रजा – पतेः । तपसा । वावृधानः । सद्यः । जातः । दधिषे । यज्ञम् । अग्ने ॥ स्वाहाकृतेनेति स्वाहा – कृतेन । हविषा । पुरोगा इति पुरः – गाः । याहि । साद्ध्या । हविः । अदन्तु । देवाः ॥ **59 (42)**

*(अग्निष्ट्वा – वा – मश्वो – द्विचत्वारिꣳशच्च) (A11)*

=====================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(सावित्राणि – व्यृद्ध – मुत्क्राम – देवस्य खनति – क्रूरं – वारुणः – सप्तभि – रेकविꣳशत्या – षड्भि – र्न ह स्म – समिद्धो अञ्ज – न्नेकादश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(सावित्रा – ण्युत्क्राम – क्रूरं – वारुणः – पशवः स्यु – र्न ह स्म – नवपञ्चाशत्)

**First and Last Padam of First Prasnam of 5th Kandam**

(सावित्राणि – हविरदन्तु देवाः)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमकाण्डे प्रथमः प्रश्नः समाप्तः ॥

**Details of Panchati and Padam for Kandam 5, Prasanam 1 (TS 5.1)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 4 | 227 |
| Anuvakam 2 | 6 | 317 |
| Anuvakam 3 | 5 | 263 |
| Anuvakam 4 | 5 | 277 |
| Anuvakam 5 | 10 | 492 |
| Anuvakam 6 | 4 | 221 |
| Anuvakam 7 | 4 | 206 |
| Anuvakam 8 | 6 | 328 |
| Anuvakam 9 | 6 | 284 |
| Anuvakam 10 | 5 | 274 |
| Anuvakam 11 | 4 | 192 |
| Total → | 59 | 3081 |

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**